Kṛtibodha
Series 3

तत्त्वानुसन्धानम्

श्री महादेवानन्दसरस्वतीविरचितम्
(अद्वैतवेदान्तप्रकरणग्रन्थः)

Tattvānusandhānam

(A Compendium of Advaita Philosophy)
by
Śrī Mahādevānanda Sarasvatī

T.V. Sathyanarayan

National Mission for Manuscripts

Kṛtibodha Series
No. 3

General Editor
Dipti Tripathi

MMM

Tattvānusandhānam

(A Prakaraṇa Grantha of Advaita Philosophy)

of

Śrī Mahādevānanda Sarasvatī

TATTVĀNUSANDHĀNAM

(A Compendium of Advaita Philosophy)

OF

Śrī Mahādevānanda Sarasvatī

Critically edited on the basis of Manuscripts

by

Vidwan Udayabhatta, Sri P.S. Ramanujam,
Sri Pravesh Vyas, Smt. C. Parvathi, Smt. P. Gowri,
Smt. M.V. Ranjini, and Smt. Manju

Consultant Editor

T.V. Sathyanarayana



NATIONAL MISSION FOR MANUSCRIPTS

New Delhi

and

NEW BHARATIYA BOOK CORPORATION

DELHI :: INDIA

Published by
National Mission for Manuscripts
No. 11, Mansingh Road
New Delhi-110 001
Ph. 2338 3894' Fax : 2307 2287
E-mail : director. namami @nic.in
www.namami.org

Co Published by
New Bharatiya Book Corporation
208, 2nd floor
4735/22, Prakashdeep Building,
Ansari Road, Daryaganj,
New Delhi-110002
Ph. 23280214, 23280209
E-mail : deepak.nbbc@yahoo.in

First Published in India in 2012

© National Mission for Manuscript

ISBN : 93-80829-00-0
ISBN : 978-93-80829-07-4

₹.150.00

तत्त्वानुसन्धानम्

श्री महादेवानन्दसरस्वतीविरचितम्

(अद्वैतवेदान्तप्रकरणग्रन्थः)

टी० वी० सत्यनारायणानां

मार्गनिर्देशानुसारं

विद्वान् उदयभट्टः, श्री पी० एस० रामानुजम्, श्री प्रवेश व्यासः, श्रीमती सी, पार्वती, श्रीमती पी० गौरी, श्री एम्० वी० रञ्जिनी, श्रीमती मञ्जुः

इत्यतैः मातृकाणामाधारेण संशोधितम्

राष्ट्रीय पाण्डुलिपि मिशन

नई दिल्ली

तथा

न्यू भारतीय बुक कॉरपोरेशन

(दिल्ली) : : (भारत)

आमुख

राष्ट्रीय पाण्डुलिपि मिशन ने पिछले प्राय: नौ वर्षों के अपने अस्तित्व-काल में पाण्डुलिपियों के क्षेत्र में अनेक महत्त्वपूर्ण उपक्रम किये हैं। भारतीय पाण्डुलिपियों के विशाल भंडार को सूचीबद्ध करने के साथ पाण्डुलिपियों का सरंक्षण, मिशन के मूलभूत कार्यक्रमों में रहा है। भारतवर्ष में पारम्परिक शास्त्रीय ज्ञान के प्रति उदासीनता के कारण आधुनिक युग में पाण्डुलिपियों एवं पाण्डुलिपिविज्ञान के अध्ययन अध्यापन का सम्यक् प्रबन्ध नहीं है। युवा वर्ग को इस दिशा में प्रेरित करने के लिए अवसर भी कम ही रहे हैं। स्थिति यह है कि यदि इस क्षेत्र में सक्रियता नहीं अपनायी गयी तो पाण्डुलिपियों को पढ़ने की क्षमता लोगों में विकसित नहीं हो सकेगी। पाण्डुलिपि मिशन इस समस्या के प्रति सजग है और शिक्षण संस्थाओं में पाण्डुलिपि शिक्षण के अभाव को देखते हुए पाण्डुलिपिविज्ञान एवं लिपिविज्ञान की मूलधार एवं प्रगत कार्यशालाएँ राष्ट्रीय स्तर पर आयोजित करता है। मूलाधार एवं प्रगत कार्यशालाओं में पाण्डुलिपिविज्ञान के परिचय के साथ कार्यक्रम का आयोजन करने वाले क्षेत्र में प्रचलित लिपि/लिपियों को पढ़ने का प्रशिक्षण भी दिया जाता है। इसके अतिरिक्त प्रगत कार्यशाला में प्रशिक्षणार्थियों को सम्पादन का सैद्धान्तिक ज्ञान एवं व्यावहारिक अनुभव प्राप्त करने का अवसर भी प्रदान किया जाता है। प्रगत कार्यशाला में सम्पादन के लिए ऐसी पाण्डुलिपियों का चयन किया जाता है जिनका सामूहिक सम्पादन कार्यशाला की समय सीमा में पूरा हो सके। ऐसी ही प्रगत कार्यशाला प्राच्यविद्या संस्थान मैसूर में आयोजित की गयी जिसमें अद्वैत दर्शन के प्रकरण ग्रन्थ 'तत्त्वानुसंधान' का सम्पादन प्रशिक्षणार्थियों ने किया। यह कार्यशाला श्री टी०बी० सत्यनारायण की देखरेख में सम्पन्न हुई।

तत्त्वानुसान्धान के लेखक माधवानन्द सरस्वती हैं। इनका काल १७वीं शताब्दी

ई० सन् है। इनके अनेक ग्रन्थ उपलब्ध होते हैं जिनमें सांख्यसूत्रवृत्ति, तत्त्वचन्द्रिका एवं विष्णुसहस्रनाम की टीका महत्त्वपूर्ण हैं। तत्त्वानुसन्धान पर स्वयं लेखक ने अद्वैतचिन्ताकौस्तुभ नामक टीका भी लिखी है। तत्त्वानुसन्धान में चार परिच्छेदों में जीवन्मुक्ति की चर्चा की गयी है।

अप्रकाशित पाण्डुलिपियों को प्रकाश में लाने के लिए राष्ट्रीय पाण्डुलिपि मिशन की योजना के अंग के रूप में प्रगत कार्यशालाएँ सक्रियता से योगदान तो करेंगी ही इनके माध्यम से युवा पीढ़ी का एक ऐसा वर्ग भी तैयार हो सकेगा जो भविष्य में स्वतन्त्र रूप से पाण्डुलिपियों के सम्पादन में समर्थ हो। कृतिबोध शृङ्खला के अन्तर्गत तत्त्वानुसन्धान का प्रकाशन विद्वानों के लिए उपयोगी होगा ऐसी आशा है।

अक्टूबर २४
विजयादशमी २०१२

दीप्ति एस० त्रिपाठी
निदेशक
राष्ट्रीय पाण्डुलिपि मिशन

सम्पादनाय उपयुक्तानां हस्तप्रतीनां* विवरणम्

अस्य ग्रन्थस्य सम्पादनाय तिस्रः हस्तप्रतयः स्वीकृताः। एताः सर्वाः तिस्रः मातृकाः मैसूरुविश्वविद्यानिलयस्य प्राच्यविद्यासंशोधनालयस्य ग्रन्थागारे समुपलभ्यन्ते। एताः प्रतीः समवलोक्य सम्पादनकार्यं कृतम्। एतासां तिसृणां हस्तप्रतीनां विवरणम् एवमस्ति—

१. "**क**" **प्रतिः**। अस्याः प्रतेः '**क**' इति सङ्केतः अस्माभिः प्रदत्तः। इयं प्रतिः सङ्ख्या C.1829 इति अस्ति। अस्यां प्रतौ आहत्य अष्टादश पत्राणि सन्ति। ग्रन्थभागः **देवनागरीलिप्यां** लिखितोऽस्ति। अत्र ग्रन्थारम्भः "**ॐ स्वस्ति श्रीगणेशाय नमः, ॐ ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम्। श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम्।।**" इत्यनेन श्लोकेन भवति। ग्रन्थस्तु पुनः "**परमसुखसमुद्रे मज्जनात् तन्मयोऽहं गलितनिखिलभेदः सत्यबोधैकरूपः।। इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवन्महादेवसरस्वतीविरचितं तत्त्वानुसन्धानं समाप्तम्। .....लिपीकृतं शुभम्**" इति अन्त्यो भवति। अत्र प्रतौ षोडश पङ्क्तयः वर्तन्ते। एकस्यां पङ्क्तौ अष्टचत्वारिंशत् अक्षराणि विद्यन्ते। अस्य प्रमाणन्तु ३२"×१५.५" अस्ति। ग्रन्थः समग्ररूपेण उपलभ्यते। सुष्ठुस्थितौ च वर्तते।

२. "**ख**" **प्रतिः**। अस्याः प्रतेः '**ख**' इति सङ्केतः अस्माभिः प्रदत्तः। अस्यां प्रतौ सप्तविंशतिः पत्राणि विद्यन्ते। प्रथमद्वितीयपत्रे लुप्ते भवतः। अत एव प्रतिरियम् असमग्रा इति परिगणिता। ग्रन्थभागः **देवनागरीलिप्यां** परिलिखितोऽस्ति। प्रतिरियं तृतीयपत्रात् प्रारभ्यते इति प्रागेवोक्तम्, तृतीयपत्रन्तु "**यद्वा यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाचको वाचक इति व्यपदिश्यते**" इति वाक्येन आरभ्यते। ग्रन्थभागः "**गलितनिखिलभेदः सत्यबोधैकरूपः, इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वतीविरचितं तत्त्वानुसन्धानं समाप्तं ग्रन्थसङ्ख्या ८८४ श्री रामशिव**" इति अन्त्यो भवति। पत्रस्य एकस्मिन् भागे एकादश पङ्क्तयः विद्यन्ते।

---

* हस्तप्रति इति शब्दः मातृका इत्यस्य पर्यायः।

पङ्क्तावेकस्यां द्विचत्वारिंशदक्षराणि सन्ति। अस्याः प्रमाणन्तु २७" × १२" वर्तते। इयमपि कर्गजमयी प्रतिः। मध्ये मध्ये कानिचन वाक्यानि लुप्तानि इति अवलोकनात् परिज्ञायते। इयमपि सुस्थितिः प्रतिः। अस्याः ग्रन्थभण्डारसङ्ख्या C-1510 अस्ति।

३."**ग**" **प्रतिः।** अस्याः प्रतेः '**ग**' इति सङ्केतः अस्माभिः प्रदत्तः। अस्यां प्रतौ तृतीयः परिच्छेदः नैव लिखितः। प्रथमद्वितीयचतुर्थपरिच्छेदाः उपलभ्यन्ते। अस्याः प्रतेः विशेषस्त्वयं प्रथमः परिच्छेदः **देवनागरीलिप्यां** लिखितः। द्वितीयचतुर्थपरिच्छेदौ **तेलुगु-(आन्ध्रा) लिप्यां** लिखितौ स्तः। परिच्छेदत्रययुतस्य अस्य ग्रन्थस्य "**अद्वैतकौस्तुभ**" इति किञ्चन व्याख्यानं संस्कृतभाषया आरचितमस्ति। एवञ्च अत्र प्रतौ ग्रन्थभागः संस्कृतव्याख्यासहितः विद्यते। परमस्माभिः अस्याः ग्रन्थसम्पादनाय केवलमूलभाग एव परिगणितः। ग्रन्थारम्भः "**श्रीगणेशाय नमः। ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम्।**" इत्यनेन श्लोकेन भवति। मूलग्रन्थसमाप्तिस्तु "**गलितनिखिलभेदः सत्यबोधैकरूपः। इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपाद शिष्यमहादेवसरस्वतीमुनिविरचितं तत्त्वानुसन्धानम्**" इत्येभिर्वाक्यैः सम्भवति। संस्कृतव्याख्याभागस्तु "**श्रीगणेशाय नमः, यः परात्मा जगत्सृष्ट्वा प्रविवेश पुनः स्वयम्। तं कृष्णं प्रत्यगात्मानं वन्दे गोपीमनोहरम्।।**" इत्यारभ्यते। व्याख्यानस्य अन्त्यः एवमस्ति "**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वती पूज्यपादशिष्यभगवन्महादेवानन्दसरस्वतीमुनिवर्यचूडामणिविरचिते तत्त्वानुसन्धानव्याख्याने अद्वैतचिन्ताकौस्तुभे चतुर्थः परिच्छेदः समाप्तः श्रीकृष्णार्पणमस्तु**" इति। एवम् अस्य व्याख्यानस्य नाम "**अद्वैतचिन्ताकौस्तुभ**" इति। अस्याः प्रतेः ग्रन्थभण्डारसङ्ख्या C-734S C-735 इति द्वयी वर्तते। C-734 सङ्ख्याभागे ग्रन्थस्य प्रथमपरिच्छेदः देवनागरीलिप्यां लिखितोऽस्ति। अत्र तिस्रः चतस्रः पञ्च वा पङ्क्तयः यथावसरं लिखिताः। एकस्यां पङ्क्तौ पञ्चाशत्त्रिपञ्चाशद्वा अक्षराणि वर्तन्ते। देवनागरीलिपिभागे ४२ पत्राणि सन्ति। इयमपि कर्गजप्रतिः। C-735 सङ्ख्याभागे द्वितीयचतुर्थपरिच्छेदौ तेलुगुलिप्यां लिखितौ। अत्रापि चतस्रः पञ्च षड् वा पङ्क्तयः विद्यन्ते। एकस्यां पङ्क्तौ ४५ अथवा ४७ अक्षराणि सन्ति। चतुर्थपरिच्छेदस्य प्रारम्भपत्रे द्वितीयपरिच्छेद इति भ्रमेण अबद्धं पदं लिखितम्। तत्तु अस्माभिः चतुर्थपरिच्छेदः इति समीचीनः कृतः। समग्रा प्रतिः सुस्थितौ वर्तते। अस्याः प्रतेः प्रमाणन्तु ३०" × १२" वर्तते।

Descriptions of the Manuscripts

For the purpose of editing this work Tattvānusandhāna, there are three different manuscripts available in the Oriental Research Institute, University of Mysore, Mysore are considered and details are presented under three division namely 1. 'क' = ka, 2. 'ख' = kha, 3. 'ग' = ga.

1. "क" (Ka) : This manuscript is on paper, for identification purpose "क" (ka) is used as the symbol. The library accession number of the same is 'C.1829.' There are 18 pages on which Devanagari script has been used. In each page there are 16 lines and in every line there are 48 syllables. In the beginning *"Om svasti śrī gaṇeśāya namaḥ, Om brahmāhaṃ yatprasādena mayi viśvaṃ prakalpitam/Śrīmatsvyamprakāśākhyaṃ praṇaumi jagatāṃ gurum//"* A prayer of Lord Gaṇeśha is given. And in the end *"iti śrīmatparamahaṃsaparivrājakācārya śrīmatsvayamprakāśānandasarasvatīpūjyapādaśiṣya-bhagavanmahādevasarasvatī-munivarya viracitam Tattvānusandhānam samāptamlipīkṛtam śubham."* There is conclusion indicating the name of the author Mahādevasarasvatī and his teacher Svayamprakāśasarasvatī. The manuscript is complete and is in good condition measuring 32 cm × 15.5 cm.

2. "ख" (Kha) : There are 27 pages of paper written in Devanagari script considered for editing under the symbol 'ख' (kha). As page numbers one and two are not available, it is not in complete form. It starts with page number 3 with the sentence *"yadvā yathā eka eva devadattaḥ kriyānimittavaśena pācako vācaka iti vyapadiśyate"* and ends with *"iti śrīmatparamahamsaparivrājakācārya-śrīmatsvayamprakāśānandasarasvatīpūjyapādaśiṣya-bhagavatā Mahādevasarasvatinā viracitam Tattvānusandhānam samāptam grantha saṅkhyā 884*

śrīrāmaśiva." There are 11 line in each page and in each line there are 42 syllables. The measurement is 27 cm × 12 cm. In some of the pages letters are not properly legible. The manuscript number of the library is 'C. 1510.'

3. "ग" (Ga) : This manuscript is considered for editing with the symbol "ग" (Ga). Out of the four chapters, the third chapter is not available. The first, second and fourth chapter are considered. The speciality of this manuscript is that the Ist chapter is in Devanagari script and remaining two are in Telugu (Andra) script. In this manuscript there is a commentary with the title "*Advaitakaustubha*" in Sanskrit. However, the commentary part of the script is not considered for editing. This manuscript also start with a prayer to Lord Gaṅeśa "*śrī gaṇeśāya namaḥ, brahmāham yatprasādena mayi viśvam prakalpitam.*" And concludes with the sentence "*iti śrīmatparamahaṃsaparivrājakācārya-śrīmatsvayamprakāśānandasarasvatīpūjyapādaśiṣya mahādevasarasvatīmuniviracitaṃ Tattvānusadhānam.*"

In the commentary, there is a prayer to Lord Gaṅeśa in the beginning and in the end there is an indication about the author Śrī Mahādevasarasvatī and his teacher Svayamprakāśasarasvatī "*iti śrīmatparamahaṃsaparivrājakācārya-śrīmatsvayamprakāśānandasarasvatīpūjyapādaśiṣya-bhagavan-Mahādevasarasvatī-munivaryacūḍāmaṇiviracite Tattvānusandhānavyākhyāne Advaitacintākaustubhe caturtha- paricchedaḥ saṃāptaḥ śrī kṛṣṇārpaṇamastu.*"

The main text is on paper, in the middle of the page, there are three to five lines, and in each line there are 53 syllables. Pages in Telugu script contain four to five lines and in each line there are 45 or 47 syllables. In the beginning of the 4th chapter there is a wrong indication as second chapter. However, based on the text available it is considered under the 4th chapter only. This manuscript is in good condition with the measurement of 30 cm × 12 cm. In the library two different manuscript numbers as given as C. 734 for Devanagari and C. 735 for Telugu script.

उपोद्घातः

कृतिरियं प्रणीता श्रीमहादेवानन्दसरस्वतीमुनिभिः। एते महाभागाः श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादानां शिष्यवराः आसन्। अद्वैतवेदान्तपरम्परायाः प्रकरणग्रन्थोऽयमिति ज्ञायतेऽस्य परिशीलनेन। कृतावस्यां सन्ति चत्वार; परिच्छेदाः। एषु चतुर्षु परिच्छेदेषु जीवात्मपरमात्मनोः स्वरूपं, ब्रह्मसाक्षात्कारे कानि साधनानि, कानि बाधकानि, मुक्तिर्नाम का, मुक्तिमार्गे के अधिकारिणः इत्यादयो बहवो विषयाः महादेवानन्दपूज्यपादैः सरलया शैल्या सम्यङ् निरूपिताः।

प्रथमपरिच्छेदः

ग्रन्थस्यास्य प्रथमपरिच्छेदे तावत् जीवः कः? कोऽयमीश्वरः? माया नाम का? इत्यादयो विचाराः प्रतिपादिताः। सरलया शैल्या विषयनिरूपणमेव ग्रन्थस्यास्य वैशिष्ट्यं वर्तते। एकमेवाज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन "**माया**", "**अविद्या**" इति च व्यपदिश्यते। तथा च अविद्याप्रतिबिम्बितं चैतन्यं जीवः। अविद्योपहितं बिम्बचैतन्यम् ईश्वरः इत्येवंप्रकारेण मायायाः जीवेश्वरयोश्च लक्षणं प्रत्यपादि।

ततः ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च उत्पत्तिप्रकारः सविस्तरः प्रदर्शितः। अन्नमयप्राणमयादीनां पञ्चानां कोशानामपि विवरणं सम्यगकारि। सप्तदशलिङ्गात्मकस्य सूक्ष्मशरीरस्य द्वैविध्यमपि प्रदर्शितं – "समष्टिव्यष्टिभेदात्" इति। किं नाम समष्टित्वम्? व्यष्टित्वं नाम किम् इति च सुविचारितम्। सञ्चितागामिप्रारब्धरूपं त्रिविधं कर्म निरूप्य पञ्चीकरणं नाम किमिति विचार्य पञ्चीकरणप्रक्रिया सुप्रदर्शिता महादेवानन्दसरस्वतीपूज्यपादैः। स्थूलशरीरस्य स्वरूपं तद्भेदांश्च निरूप्य जीवस्य जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणरूपभेदाः प्रदर्शिताः। जीवेश्वरयोः बिम्बप्रतिबिम्बभावं प्रदर्श्य प्रतिबिम्बं न कदापि बिम्बातिरिक्तं भवति, किन्तु अतिरिक्तमिव भासते। तत्र कारणम् अज्ञानम्, एतदेवाज्ञानं "**माया**" इति कथ्यते अद्वैतिभिः, अतः जीवात्मपरमात्मनोरैक्यं सुतराम् अङ्गीकरणीयम् इति

अद्वैतवादः समुपस्थापितः। महादेवानन्दसरस्वतीपूज्यपादानां निरूपणं वर्तते हितं मितं मनोहारि च।

द्वितीयपरिच्छेदः

अत्र तावत् आदौ विषयचैतन्याभिव्यञ्जकोऽन्तःकरणाज्ञानयोः परिणामविशेषो वृत्तिरिति प्रतिपाद्य परिणामो नाम कः? विवर्तपरिणामयोः को भेद इति विचारितम्। उपादानसमसत्ताकान्यथाभावः परिणामः, उपादानविषमसत्ताकान्यथाभावो विवर्त इति तल्लक्षणम् अभ्यधायि। ततः प्रमाअप्रमाभेदेन वृत्तिर्द्विधा इति प्रोच्य ईश्वराश्रया जीवाश्रया चेति प्रमायाः अपि द्वैविध्यं प्रादर्शि। तत्रापि पारमार्थिकी व्यावहारिकी चेति भिन्नां जीवाश्रयप्रमां निरूप्य षड्विधा – व्यावहारिकी प्रमा व्याख्याता – "**प्रत्यक्षानुमित्युपमिति-शब्दार्थापत्त्यनुपलब्धिभेदात्**" इति। आसां षण्णामपि प्रमाणानां लक्षणं, तद्भेदान् उपभेदान् अवान्तरभेदान् सप्रमाणं सोदाहरणं च निजगदुः पूज्यपादाः। पूज्यपादानां वाक्ययोजनासरणिः प्रवाह इव प्रवर्तते। गभीरा नदी यथा प्रवहति तथैव पूज्यपादानां वादसरणिरपि। एकमुदाहरणं पश्यामः —

"वाक्यकरणिका प्रमा शाब्दी। आकाङ्क्षायोग्यतासन्निधिमत्पदसमुदायो वाक्यम्, अन्वयानुपपत्तिराकाङ्क्षा। वाक्यार्थाबाधो योग्यता। अविलम्बेनोच्चारणं सन्निधिः। अव्युत्पन्नस्य सङ्गतिग्रहाभावात् न वाक्यार्थप्रमा। पदपदार्थयोः स्मार्यस्मारकभावः सङ्गतिः। सा च द्विधा — शक्तिर्लक्षणा चेति। शक्तिर्नाम मुख्या वृत्तिः। सा च द्विविधा – योगो रूढिश्चेति। अवयवशक्तिर्योगः। रूढिः समुदायशक्तिः। सा च व्यवहारादिना गृह्यते।" एवं प्रवहति पूज्यपादानां व्याख्याझरी।

ततः तात्पर्यं नाम किमिति विचार्य वक्तृतात्पर्यशब्दतात्पर्यभेदेन द्वैविध्यं प्राप्तं तात्पर्यम् उपक्रमोपसंहारादिभिः षड्विधैर्लिङ्गैर्निश्चीयते इति प्रतिपादितम्। श्रवणमनननिदिध्यासनानां स्वरूपम् उपवर्ण्य संन्यासो नाम कः? तस्य कति भेदाः वर्तन्ते? किं नाम वैराग्यम्? तस्य प्रभेदाः के? के तावत् संन्यासे अधिकारिणः? संन्यासिनाम् अधःपतनहेतुः कः इत्यादयो बहवो विषयाः सविस्तरं उपवर्णिताः। अन्ते तावत् परोक्षाऽपरोक्षप्रमाभ्याम् असत्त्वापादकमौढ्यज्ञानस्य असत्वाऽऽभानापादकाऽज्ञानस्य च निवृत्तिर्भवति इति सुष्ठु प्रतिपाद्य सावरणज्ञानं षड्विधप्रमया अवश्यं निवर्तते इति सिद्धान्तितं पूज्यपादैः।

तृतीयपरिच्छेदः

द्वितीयपरिच्छेदे प्रमा सुविचारिता। अस्मिन् परिच्छेदे प्रस्तौति अप्रमा – "**प्रमाभिन्नं**

ज्ञानम् अप्रमा'' इति। इयम् अप्रमा स्मृत्यनुभूतिभेदाभ्यां द्विधा विभक्ता। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। स्मृतिभिन्नं ज्ञानम् अनुभूतिः। यथार्थायथार्थभेदेन स्मृत्यनुभूती पुनर्द्विधा प्रविभक्ते। तत्र बाधितविषया अनुभूतिरयथार्था। संशयनिश्चयभेदाभ्यां अयथार्थानुभूतिरपि पुनर्द्विधा। को नाम संशयः इति प्रश्ने सञ्जाते उच्यते–''**एकस्मिन् धर्मिणि भासमानविरुद्धनानाकोटिकज्ञानं संशयः।**'' एष संशयः द्वैविध्यं भजते – प्रमाणसंशयप्रमेयसंशयभेदात्। तत्र प्रमाणगता असम्भावना प्रमाणसंशयः। प्रमेयगता असंभावना प्रमेयसंशयः। प्रमेयगता असम्भावना पुनर्द्विविधा – आत्मगता अनात्मगता चेति। अयं सर्वोऽपि संशयो मननेन तर्कात्मकेन निवर्तते इत्युक्तम्।

संशयविरोधिज्ञानं निश्चयः। स च द्विविधः – यथार्थोऽयथार्थश्चेति। तत्र यथार्थनिश्चये तर्कविपर्ययनिरुपाधिकसोपाधिकबाह्याभ्यन्तरान्तकरणवृत्ति-अविद्यावृत्त्यादयो नैके प्रभेदाः दरीदृश्यन्ते। भूतभाविवर्तमानभेदात् त्रिविधः प्रतिबन्धः। तत्र भाविप्रतिबन्धः पुनर्द्विविधः – प्रारब्धशेषो ब्रह्मलोकेच्छा चेति। फलाभिसन्धिकृतं केवलं चेति प्रारब्धं कर्म द्विविधम्। तत्र ब्रह्मलोकेच्छायाः ब्रह्मसाक्षात्कारोत्पत्तिप्रतिबन्धकत्वम् आहुः विद्यारण्यस्वामिनः। ब्रह्मसाक्षात्कारोत्पत्तौ शम-दम-उपरति-तितिक्षादीनि अन्तरङ्गसाधनानि। यज्ञादयो बहिरङ्गसाधनानि इत्युक्तम्।

''**मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यते**'' इत्युक्तरीत्या तत्त्वज्ञानेनैव मुक्तिरिति प्रभाषि पूज्यपादैः। विषयेऽस्मिन् श्रुतिस्मृतिपुराणवचनानि प्रमाणत्वेन समुपस्थापितानि। तत्र श्रवणमनननिदिध्यासनादिभिर्ब्रह्मसाक्षात्कारः, ततो ब्रह्मलक्षणा मुक्तिः सिध्यतीति ''**ब्रह्मविद् ब्रह्मैव भवति,**'' ''**तरति शोकमात्मवित्**'' इत्यादिश्रुतिवचनैः संसाधितम्। अन्ते वृक्षाग्रात् पतितः पुरुषः अनिच्छन्नपि यथा भूमौ पतति तथा गुणपुरुषज्ञः (ब्रह्मविद् मुक्तिम्) अनिच्छन्नपि केवलीभवति (ब्रह्मैव भवति) इति प्रतिपादितम्।

चतुर्थपरिच्छेदः

पूर्वस्मिन् परिच्छेदे श्रवणमनननिदिध्यासनादिभिर्ब्रह्मसाक्षात्कारः, ततो ब्रह्मलक्षणा मुक्तिः सिद्ध्यतीति प्रतिपादितम्। एतस्मिन् चतुर्थपरिच्छेदे तादृश्याः मुक्तेर्द्वैविध्यं, जगतो मिथ्यात्वं, तत्त्वस्याभ्यासः सर्वेषां दोषाणां मूलं, वासनारूपितस्य मनसः सर्वनाशकत्वं, मनोजये समाश्रियमाणा युक्तिः, जीवन्मुक्तिसाधनानि प्रयोजनानि च सम्यङ्निरूप्य एतदुपष्टम्भकत्वेन श्रुतिस्मृतिपुराणवचनानि निदर्शनरूपेण समुपस्थाप्य परिच्छेदममुं समलञ्चक्रुः श्रीमहादेवानन्दसरस्वतीपूज्यपादाः।

एषा मुक्तिर्द्विविधा – विदेहमुक्तिः जीवन्मुक्तिश्चेति। तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो विदेहमुक्तिः। श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः

कर्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिः जीवन्मुक्तिः। इयं जीवन्मुक्तिः तत्त्वज्ञानवासना-क्षयमनोनाशाभ्यासात् सिद्ध्यति। तत्त्वं सर्वथानुसन्धेयम्। तच्च अभ्यासेन सिद्ध्यति। अत्र अभ्यासो नाम उत्पन्नस्य तत्त्वज्ञानस्य पुनः पुनः केनाप्युपायेन अनुसन्धानम्। तदुक्तम् –

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्।
एतदेव परं तत्त्वं ब्रह्माभ्यासं विदुर्बुधाः।। इति

मुमुक्षुभिरवश्यं जगतोऽस्य मिथ्यात्वम् अभ्युपेयम्। मायावृतमिदं जगदनित्यमिति मन्तव्यं स्वप्नप्रपञ्चवत्। तदुक्तम् –

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः।
एवं जगत्प्रपञ्चोऽयं मयि मायाविजृम्भितः।। इति

"**सङ्गात्सञ्जायते कामः**" इति गीताचार्योक्तरीत्या सङ्ग एव सर्वदोषाणां निदानम्। यतयोऽपि सङ्गात् पतिताः भवन्ति। अतः यतिभिरवश्यं निःसङ्गतया भाव्यम् इति विष्णुपुराणवचनमुपस्थाप्य प्रपञ्चयामासुः।

निःसङ्गता मुक्तिपदं यतीनां सङ्गादशेषाः प्रभवन्ति दोषाः।
आरूढयोगोऽपि निपात्यतेऽधः सङ्गेन योगो किमुताल्पबुद्धिः।। इति

उपभोगदृष्टिः सर्वनाशहेतुरिति स्पष्टं प्रावाचि आचार्यैः –

योषिद्भिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः।। इति

किञ्च वासनारूषितस्य मनसो निग्रहस्तु दुष्करः। किन्तु सतताभ्यासेन वैराग्येण च मनोनिग्रहः कर्तव्यः –

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।

इति गीताचार्यवचनमुदाहृत्य प्रतिपादितम्। एतादृशं सर्वनाशकारणीभूतं चित्तं जेतुं का युक्तिः समाश्रयणीया इति विचिन्त्य पुष्टिकर्यो युक्तः प्रदर्शिताः—

अध्यात्मविषयाधिगमः साधुसङ्गम एव च।
वासनासम्परित्यागः प्राणस्पन्दनिरोधनम्।
गतास्तु युक्तः पुष्टाः सन्ति चित्तजये किल।। इति

एवं तत्त्वज्ञानवासनाक्षयमनोनाशाभ्यासात् जीवन्मुक्तिः सिद्ध्यति। एतस्याः जीवन्मुक्तेः सन्ति पञ्च प्रयोजनानि – ज्ञानरक्षा तपो विसंवादाभावो, दुःखनिवृत्तिः सुखाविर्भावश्चेति।

तस्मात् ब्रह्मवित् जीवन्मुक्तो भोगेन प्रारब्धकर्मणि क्षीणे वर्तमानशरीरपाते अखण्डैकरसब्रह्मानन्दात्मना अवतिष्ठते। अतः एतादृशं तत्त्वज्ञानं श्रवणमनननिदिध्यासनादिभिः सम्पाद्य अमन्दानन्दसन्दोहरूपं ब्रह्म अनुभोक्तव्यम्, "**ब्रह्मविद् ब्रह्मैव भवति**" इति श्रुत्युक्तरीत्या ब्रह्मैव भवितव्यम् इति समुपदिदिशुः पूज्याः श्रीमन्महादेवानन्दसरस्वतीमुनयः। अस्य लघुग्रन्थस्य अध्ययनेन परतत्त्वस्य समधिकं ज्ञानं सुष्ठु सम्भवति। तज्ज्ञानम् अस्माकं समेषां भवबन्धमोचकनिदानं भवतु इत्याशास्महे।

Tattvānusandhānam

(A Prakaraṇa Grantha of the Advaita Philosophy) by Mahādevānanda Sarasvatī

Advaita a great philosophy of India was advocated by Śrī Ādiśankarācārya and has been interpreted vividly by number of scholars of Indian Philosopy. Advaita is an ancient philosophy aiming to describe the secrets of self realisation, which is equallent to realisation of one's nature called Brahman. In almost every century a host of scholars have attempted to give their own explanations based on their realisation of the Idea *Advaita*. This idealogy can be found in the *Pañcadaśī* by Vidyāraṇya, *Vedāntasāra* by Sadānanda, *Vedāntaparibhāṣā* by Dharmarājādhvarīndra. The *Tattvānusandhāna* by Mahādevānandasarasvatī is also one such treatise to explain Ādiśankarācārya's Advaita Philosophy.

The Tattvānusandhāna is believed to have been authored by Mahādevānandasarasvatī in the seventeenth century A.D.[1] He was the author of the *Sāṅkhyapravacanasūtravṛttisāra* or *Sāṅkhya-sūtravrtti,*[2] *Tattvacandrikā* and the *Viṣṇusahasranāmaṭīkā* composed in 1694[3]. *Tattvānusandhāna* is his interpretation of Advaita philosophy with a commentary entitled *'Advaitacintākaustubha.'*[4] In his writing at the end he writes himself as *"iti śrīmatparamahaṃsaparivrājakācārya-śrīmatsvayamprakāśānandasarasvatīpūjyapādaśiṣya-bhagavan Mahādeva-sarasvatī-munivarya-viracitam....."* Therefore he is considered to be the disciple of Svayamprakāśasarasvatī or Svayamprakāśānanda Sarasvatī, who lived in seventeenth century A.D. He was the author of the *Veda Nyāyasaṅgraha,* a commentary on the *Śaṅkarabhāsya* on

---

1. पं० द्विजेन्द्रनाथशास्त्री : संस्कृतसाहित्यविमर्शः, Delhi, 1956, p. 202.
2. Mss. No. C. 1711, Oriental Research Institute, Mysore.
3. Theodor Aufrecht, *Catalogus Catalogorum*, 1962, p. 437.
4. डॉ० राममूर्तिशर्मा : अद्वैत वेदान्त, Delhi, 1972, p. 188.

the *Brahmasūtra*.[1] Mahādevānandasarasvatī being an advaitist has successful in offering commentary in a simple language.

The *Tattvānusandhāna is a small text with four pariccheda or chapters. The text deals with the attainment of self realisation called Jīvanmukti* and freedom from the cycle of birth. *The most important concept of Advaita metaphysics Māyā or Avidyā has been elaborately presented in the first pariccheda* and it has been explained that when *Māyā* or *Avidyā* is sub-divided from *jñāna* and *kriyā* that can lead to the removal of *Ajñāna. In this text the concept of jīvātman and his perception of breaking original unity between God and the world* and reason for the distorted picture and even the way to accomplish unity to realise the Supreme Conciousness called *Brahman* has been discussed.

References

1. Theodor Aufrecht : C.C. An Alphabetical Register of Sanskrit Works and Authors, part - I, Wiesbaden.
2. पं० द्विजेन्द्रनाथशास्त्री : संस्कृतसाहित्यविमर्शः, भारतीयप्रतिष्ठानम्, दिल्ली, १९५६
3. डॉ० राममूर्तिशर्मा : अद्वैत वेदान्त, नेशनल पब्लिशिंग हाऊस, दिल्ली, १९७२
4. महादेवानन्दसरस्वती : साङ्ख्यप्रवचनसूत्रवृत्तिसार, Mss. No. C. 1711, प्राच्यविद्यासंशोधनालयः, मैसूरु।

Scheme of transliteration
(Devanāgarī to Roman)

Vowels

अ	आ	इ	ई	उ	ऊ	
a	ā	i	ī	u	ū	
ऋ	ॠ	ऌ	ए	ऐ	ओ	औ
ṛ	ṝ	ḷ	e	ai	o	au

Consonants

क	ख	ग	घ	ङ
ka	kha	ga	gha	ṅa
च	छ	ज	झ	ञ
ca	cha	ja	jha	ña
ट	ठ	ड	ढ	ण
ṭa	ṭha	ḍa	ḍha	ṇa
त	थ	द	ध	न
ta	tha	da	dha	na
प	फ	ब	भ	म
pa	pha	ba	bha	ma
य	र	ल	व	ळ
ya	ra	la	va	ḷa

Sibilants

श	ष	स

śa	ṣa	sa

Aspirate

ह	ha

Anusvara and Visarga

÷	÷
ṁ/ṃ	h

Anunasika

ँ

~

e.g.

अँ	आँ
ā	ã

Editors

1. **Vidwan Udayabhatta,** M.A., B.Ed.
   Assistant Professor of Vyakaranashastra
   Government Maharaja's Samskrit College
   Mysore - 570 024
2. **Smt. C. Parvathi,** M.A.,
   Research Assistant
   Oriental Research Institute
   University of Mysore, Mysore
   Karnataka
3. **Smt. P. Gowri,** M.A.,
   Surveyor, National Mission for Manuscript
   Oriental Research Institute
   University of Mysore, Mysore
   Karnataka
4. **Sri P.S. Ramanujam,** M.A.,
   Project Assistant,
   The Academy of Sanskrit Research
   Melukote, Karnataka
5. **Smt. M.V. Ranjini,** M.A., M.Phil.
   Research Scholar (Literature)
   Sri Shankaracharya Samskrita Vishvavidyanilaya
   Kaladi, Kerala.
6. **Ms. Manju P.S.,** M.Phil.
   Research Assistant Centre for Heritage Studies
   Hill Palace, Thripunithura,
   Ernakulam District, Kerala.
7. **Sri Pravesh Vyas,** M.A.,
   Research Scholar
   Sri Lal Bahaddur Shastri Rashtriya Samskrita Vidyapeetha
   New Delhi - 16

[1]श्रीगणेशाय नमः

।।अथ प्रथमः परिच्छेदः।।

[2]ॐ ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम्।
श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम्।। १।।

देहो नाहं श्रोत्रवागादिकानि
नाहं बुद्धिर्नाहमध्यासमूलम्।
नाहं सत्यानन्दरूपश्चिदात्मा
माया साक्षी कृष्ण एवाहमस्मि।। २।।

अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात् तस्य च पदार्थज्ञानाधीनत्वात् तदर्थं तत्पदार्थं निरूपयामः। तत्पदार्थस्य लक्षणं द्विविधम् – तटस्थलक्षणं स्वरूपलक्षणञ्चेति। सृष्टि-स्थितिलयकारणत्वं तटस्थलक्षणम्, "[3]यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतेः। तदुक्तं भगवता सूत्रकारेण "जन्माद्यस्य यत" इति। सत्यज्ञानानन्दाः स्वरूपलक्षणम्, "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मेति व्यजानात्" इत्यादि श्रुतेः। उक्तञ्च "आनन्दादयः प्रधानस्य[4]ति"। स च द्विविधः। वाच्यार्थो लक्ष्यार्थश्चेति। मायोपहितचैतन्यं तत्पदवाच्यार्थः। मायाविनिर्मुक्तचैतन्यं

---

१. **स्वस्ति श्रीगणेशाय नमः - क; ख प्रतौ एतत् वाक्यं नैव उपलभ्यते।** ॐ ब्रह्माहं यत्प्रसादेन इत्यारभ्य यद्वा यथा इति पर्यन्तं केचन भागाः लुप्ताः। 'ग' प्रतौ ग्रन्थः व्याख्या-युतः अस्ति। अतो ग्रन्थादौ श्री गणेशाय नमः इति व्याख्याकारः लिखति, न तु ग्रन्थकारः।

२. ॐ इति पदं 'क' प्रतौ अस्ति, ख, ग, प्रत्योः नास्ति

३. यतो वा इत्यारभ्य जन्माद्यस्य यत इति पर्यन्तो भागः ग प्रतौ नैव दृश्यते।

४. स च द्विविधः ..... लक्ष्यार्थः इत्यन्तो भाग, ग प्रतौ नैव दृश्यते।

तत्पदलक्ष्यार्थः। अथ केयं माया? शृणु – यथा शुक्त्यादौ रजतादिकल्पितं तथा चेतनेऽचेतनं कल्पितम्। "इदं सर्वं यदयमात्मा" "आत्मैवेदं सर्वं" "ब्रह्मैवेदं सर्वं" "पुरुष एवेदं विश्वं" "सर्वं खल्विदं ब्रह्म" "वासुदेवः सर्वं" "नारायणः सर्वमिदं पुराणम्" इत्यादि श्रुतिस्मृतिवाक्यशतैः अचेतनस्य चेतनव्यतिरेकेण अभावप्रतिपादनात्। चेतनाचेतनयोः अभेदयोगाच्च[1]। चेतनं नित्यशुद्धबुद्धमुक्तं सत्यं परमानन्दाद्वयं ब्रह्म अचेतनमज्ञानादि जडजातम्। अज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं ज्ञाननिर्वत्यम्, अहं ब्रह्म न जानामि इत्यनुभवात् "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादि श्रुतेः।

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।।

इति स्मृतेश्च। तच्च अज्ञानं द्विविधम् – मायाऽविद्याभेदात्। शुद्धसत्त्वप्रधानं सन्मायेत्युच्यते। मलिनसत्वप्रधानं सदविद्येत्युच्यते। "जीवेशौ आभासेन करोति माया चाऽविद्या स्वयमेव भवति" इति श्रुतेः। अथवा ज्ञानस्य शक्तिर्द्विविधा – ज्ञानशक्तिः क्रियाशक्तिश्चेति। रजस्तमोभ्यामनभिभूतं सत्त्वं[2] ज्ञानशक्तिः, "सत्त्वात्सञ्जायते ज्ञानम्" इति[3] स्मृतेः। क्रियाशक्तिर्द्विविधा – आवरणशक्तिर्विक्षेपशक्तिश्चेति। रजस्सत्त्वाभ्यामनभिभूतं तम आवरणशक्तिः। तदुक्तम् – "कृष्णं तमः आवरणात्मकत्वात्"[4] इति। सा च नास्ति न प्रकाशत इति व्यवहारहेतुः तथा चोक्तम् – "न भाति नास्ति कूटस्थः इत्यापादनम् आवृत्तिरिति।" तमस्सत्त्वाभ्यामनभिभूतं रजो विक्षेपशक्तिः – "रजसो लोभ एव च" इति स्मृतेः। लोभादीनां विक्षेपकत्वं प्रसिद्धमेव। सा च आकाशादि–प्रपञ्चोत्पत्तिहेतुः।[5] तदुक्तं – "विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्" इति। तथा च पूर्वोक्ताज्ञानमावरणशक्तिप्रधानं सत् अविद्येत्युच्यते। अज्ञानं[6] विक्षेपशक्तिप्रधानं सत् मायेत्युच्यते। एतदभिप्राया स्मृतिरपि – "तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः।।" इत्येवंरूपा द्रष्टव्या। एवञ्च मायोपहितं

---

१. योगात् – क
२. ज्ञानं शक्ति – ग
३. श्रुतेः – क
४. 'इति' इति पदं क प्रतौ अधिकं दृश्यते
५. उक्तञ्च – ग
६. विक्षेपशक्तियत् माया – क

चैतन्यम् ईश्वरो जगत्कारणमन्तर्यामी इत्युच्यते। स एव तत्पदवाच्यार्थः। अविद्योपहितं चैतन्यं जीवः प्राज्ञ[1] इति चोच्यते। तदुक्त –

तमोरजस्सत्त्वगुणा प्रकृतिर्द्विविधा च सा।
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते।।
[2]मायामिन्द्रो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः।
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा।। इति

"अस्मात् मायी सृजते[3] विश्वमेतदस्मिंश्च अन्यो मायया सन्निरुद्धः" –

मायां तु प्रकृतिं[4] विन्द्यात् मायिनं तु महेश्वरम्

इत्येवमादयः श्रुतयः उक्ताभिप्रायाः द्रष्टव्याः। यद्वा यथा एक एव देवदत्तः क्रियानिमित्तवशेन [5]पाचकः पाठकः इति व्यपदिश्यते। तथा एकमेव अज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाऽविद्येति च व्यपदिश्यते। तथा च अविद्याप्रतिबिम्बितं चैतन्यं जीवः।[6] अविद्योपहितबिम्बचैतन्यम् ईश्वरः। "आभास एव च।" "अत एव उपमा सूर्यकादिवत्" "यथा ह्ययं ज्योतिरात्मा [7]विवस्वानधोभिन्नो बहुधा एकोऽनुगच्छन्वन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेषु एवम् अजोऽयमात्मा"

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।।

इत्यादिश्रुतिसूत्रयोस्सत्त्वात्। अस्मिन्पक्षे जीवस्तु एक एव। तस्मिन् अन्तःकरणविशिष्टाः प्रमातारः कल्पिताः। केचित्तु नानाऽज्ञानं स्वीकृत्य वनवत् अज्ञानसमुदायः[8] समष्टिः तदुपहितं चैतन्यम् ईश्वरः। वृक्षवत् प्रत्येकमज्ञानं व्यष्टिः तदुपहितं चैतन्यं प्राज्ञ इति

---

१. इत्युच्यते – क
२. मायाविं वो वशीकृत्वा – क, शुद्धपाठमनुसृत्य मायामिन्द्रोवशीकृत्य इति पाठः स्वीकृतः।
३. विश्वमेतत्त्वस्मिंश्च – ग
४. विद्यात् – ग
५. पाचको वाचक इति – ख,
याचकः पाठकः इति – क
६. अविद्योपहितं चैतन्यम् – क
७. विवस्वानपोभिन्ना – क, ग
८. सप्रष्टिः – क

वदन्ति। अन्ये तु कारणीभूताज्ञानोपहितं चैतन्यमीश्वरः, अन्तःकरणोपहितं चैतन्यं जीवः। "कार्योपाधिरयं" जीवः [१]कारणोपाधिरयमीश्वर" इति वचनात् इत्याहुः। सर्वथाऽपि मायोपहितं चैतन्यमीश्वरः। स च [२]ज्ञानशक्तिमदुपहितस्वरूपेण जगत्कर्ता विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानम् ऊर्णनाभिवत्, "यथोर्णनाभिः सृजते[३] गृह्णते च" इत्यादिश्रुतेः "यः[४] सर्वज्ञः स विश्वकृत् स हि सर्वस्य कर्ता" इत्यादिः श्रुतिभ्यश्च। एवं पूर्वोक्तादीश्वरात् आकाश उत्पद्यते "आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी"[५] "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादि श्रुतेः। मायायाः सत्त्वरजस्तमोगुणात्मकत्वात् तत्कार्याणि[६] आकाशादीनि सत्त्वरजस्तमोगुणात्मकानि अपञ्चीकृतानि सूक्ष्मभूतानि इति च वर्णयन्ति। एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि सूक्ष्मशरीराणि च सप्तदशलिङ्गात्मकानि जायन्ते। सप्तदशलिङ्गानि तु[७] ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च मनो बुद्धिः पञ्च प्राणाश्चेति। तथा च आकाशादिसात्त्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेन्द्रियाण्युत्पद्यन्ते। [८]आकाशस्य सात्त्विकांशात्[९] श्रोत्रमुत्पद्यते। वायोः सात्त्विकांशात् त्वगिन्द्रियम्। तेजसः सात्त्विकांशात् चक्षुः। अपां सात्त्विकांशात्[१०] रसनम्। पृथिवीसात्त्विकांशात्[११] घ्राणम्। आकाशात् श्रोत्रम् इत्यादि श्रुतेः आकाशादीनां सात्त्विकांशेभ्यो मिलितेभ्यो अन्तःकरणमुत्पद्यते। तत्सङ्कल्पविकल्पनिश्चयाभिमानानुसन्धानरूप[१२]-वृत्तिभेदाच्चतुर्विधम्। "मनोबुद्धिरहङ्कारश्चित्तं चेति चतुर्विधम्।"

सङ्कल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी।
अभिमानात्मकस्तद्वदहङ्कारः प्रकीर्तितः।।
अनुसन्धानरूपञ्च चित्तमित्यभिधीयते।।

---

१. कारणोपाधिरीश्वर इति – ख, ग
२. ज्ञानशक्युपहित – ख, ग
३. गृह्यते – ग
४. सर्वज्ञः सर्ववित् स विश्ववित् स हि – ख
५. च इति क, ख प्रतौ
६. अपि इति अधिकं दृश्यते – ग
७. ज्ञानेन्द्रियाणि पञ्च मनो बुद्धिः पञ्च कर्मेन्द्रियाणि पञ्च प्राणाश्चेति – ग
८. आकाश सात्त्विकांशात् – क, ख
९. श्रोत्रं वायोः – ग
१०. रसना – ख, ग
११. घ्राणं श्रोत्रमाकाश इत्यादि श्रुतेः – ख, ग
१२. वृत्त भेदात् – क

इति वार्तिकवचनात्। पूर्वोक्ताकाशादिराजसांशेभ्यो व्यस्तेभ्यः कर्मेन्द्रियाणि उत्पद्यन्ते। आकाशराजसांशात् वागीन्द्रियम् उत्पद्यते। वायोः राजसांशात् हस्तौ। तेजसो राजसांशात् पादौ। अपां राजसांशात् पायुः पृथिवीराजसांशत् उपस्थ आकाशादिराजसांशेभ्यो मिलितेभ्यः[१] प्राणः उत्पद्यते। सोऽपि वृत्तिभेदात् पञ्चविधः – [२]प्राग्गमनवान् नासाग्रवर्ती प्राणः। अर्वाग्गमनवान् पाय्वादिस्थानवर्ती अपानः। विष्वग्गमनवान्[४] सर्वशरीरवर्ती व्यानः। ऊर्ध्वगमनवान्[३] कण्ठस्थानवर्ती उदानः। अशितपीतान्नपानादिसमीकरणकरोऽखिलशरीरवर्ती समानः। "वाक्पाणिपादपायूपस्थानि[५] कर्मेन्द्रियाणि तेषां[६] क्रमेण" इत्यादिश्रुतेः। अन्नमय-प्राणमय-मनोमय-विज्ञान-मयानन्दमयकोशाः पञ्च अत्रैव अन्तर्भवन्ति। वक्ष्यमाण-स्थूलशरीरम् अन्नमयकोशः। उक्तं सूक्ष्मशरीरं कोशत्रयात्मकम्। कर्मेन्द्रियैः सहितः प्राणः प्राणमयकोशः। कर्मेन्द्रियैः सहितं मनः मनोमयकोशः। ज्ञानेन्द्रियैः सहिता बुद्धिः विज्ञानमयः कोशः। अयमेव कर्तृत्वोपाधिः "विज्ञानं यज्ञं तनुते" इत्यादि श्रुतेः। अन्तःकरणस्य सत्त्ववृत्तिर्द्विविधा – निश्चयवृत्तिः सुखाकारवृत्तिश्चेति। निश्चयवृत्तिमदन्तः, करणं बुद्धिरित्युच्यते। सुखाकारवृत्तिमदन्तःकरणं भोक्तृत्वोपाधिः। "तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा" इत्यादिश्रुतेः। अयमेव कारणपर्यन्त आनन्दमयः कोशः। केचित्तु अज्ञानम् आनन्दमयं कोशं वदन्ति। इदं सूक्ष्मशरीरं सप्तदशलिङ्गं द्विविधं समष्टिव्यष्टिभेदात्। अपञ्चीकृतपञ्चमहा[८]-भूततत्कार्यसप्तदशलिङ्गं समष्टिरित्युच्यते। एतदुपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते।[९] प्राणः सूक्ष्मात्मेति च। ज्ञानक्रियाशक्तिमदुपहितत्वात् व्यापितत्वाच्च। अथवा पूर्वोक्तापञ्चीकृतभूतेभ्यः सर्वव्यापकं लिङ्गशरीरं पृथगेवोत्पन्नम्। तदेव समष्टिरित्युच्यते। समष्टित्वं नाम गोत्वादिवत् सर्वत्र व्यष्टिषु अनुस्यूतत्वम्।[१०] तदुक्तम् – "तेभ्यः समभवत् सूत्रं लिङ्गं सर्वात्मकं महत्" इति। केचित्तु वनवल्लिङ्गशरीरसमुदायः समष्टिरिति वदन्ति।[११] प्रत्येकं लिङ्गशरीरं व्यष्टिरित्युच्यते। व्यष्टित्वन्नाम व्यक्तिवद् व्यावृतत्वम्। एतदुपहितं

---

१. प्राणा उत्पद्यन्ते – क
२. पराग्गमनवान् – ग
३. कण्ठवृत्युदानः – ग; कण्ठवर्त्युदानः – ख
४. समीकरण कर्ताऽखिल – ग
५. पस्थाख्यानि – ग
६. तत्रैव – ख
७. पक्षः प्रमोद उत्तरः पक्षः – इति ग प्रतौ नास्ति।
८. भूतकार्य – ग
९. प्राणः सूत्रात्मेति च – ख, ग
१०. लिङ्ग समुदायः – ख
११. प्रत्येक लिङ्ग शरीरं – क, ग

चैतन्यं तैजस इत्युच्यते। तेजोमयान्तः-करणोपाधित्वात्। सामान्यविशेषयोरिव[१] जातिव्यक्त्योरिव च समष्टिव्यष्ट्योः तादात्म्याभ्युपगमात् तदुपहितयोः तैजससूत्रात्मनोरपि तादात्म्यम्। एतदेव सूक्ष्मशरीरम् अविद्याकामकर्मसहितं पुर्यष्टकमित्युच्यते। ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकम्[२] अन्तःकरणचतुष्टयं प्राणादिपञ्चकं भूतसूक्ष्मपञ्चकम् अविद्याकामकर्म च इत्येतान्यष्टौ।[३] तत्कार्या अविद्या द्रष्टव्या। सा चतुर्विधा — अनित्ये नित्यत्वबुद्धिः[४] अशुचौ शुचित्वबुद्धिः[५] असुखे सुखत्वबुद्धिः[६] अनात्मनि आत्मबुद्धिश्चेति। तदुक्तम् "अनित्याशुचिदुःखाऽनात्मसु नित्यशुचिसुखात्मख्यातिः अविद्या" इति अस्यार्थः।[७] अनित्ये ब्रह्मलोकादिसंसारफले नित्यबुद्धिरेका अविद्या द्रष्टव्या। अशुचिषु स्वशरीरपुत्रभार्यादिशरीरेषु शुचित्वबुद्धिः अपरा।[८] दुःखेषु दुःखसाधनेषु च सुखतत्साधनबुद्धिरन्या[९]। अनात्मनि देहेन्द्रियादिषु अहमित्यात्मबुद्धिरितरा चेति अविद्या चतुर्विधा इति। कामो रागः। कर्म त्रिविधम् — सञ्चितम् आगामि प्रारब्धञ्चेति। स्वकृतं फलमदत्त्वा अदृष्टरूपेण विद्यमान सञ्चितं[१०] कर्म। यथा सन्ध्यावन्दनाग्निहोत्रादि। आगामि अस्मिन् शरीरे क्रियमाणं कर्म। वर्तमानशरीराम्भकं[११] प्रारब्धं कर्म। सञ्चितागामिकर्मणोः फलोपभोगेन[१२] वा विरोधिकर्मान्तरेण वा ब्रह्मज्ञानेन वा विनाशः। प्रारब्धस्य तु भोगेनैव नाशः। किं बहुना, प्रारब्धव्यतिरिक्तानाम् अविद्यादीनां पञ्चक्लेशानां तत्त्वज्ञानान्नाशः। तथा हि अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। कार्यकारणरूपा द्विविधा — अविद्या निरूपिता। अहङ्कारस्य सूक्ष्मावस्था अस्मिता। इदमेव महत्तत्त्वं सामान्याहङ्कार[१३] इति चोच्यते। रागः उक्तः। द्वेषः क्रोधः। स्वीकृतस्य पुनस्त्यागासहिष्णुत्वम् अभिनिवेशः। एतेषां पञ्चानां ब्रह्मसाक्षात्कारान्निवृत्तिः "ज्ञात्वा देवं मुच्यते सर्वपाशैः" इत्यादिश्रुतेः। पाशैः पञ्चक्लेशैः इत्यर्थः। तिष्ठतु तावत् प्रासङ्गिकम्। एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता।

---

१. योरपि – ग
२. कर्म चेतान्यष्टौ – ग
३. तत्र कार्या अविद्या – ख, ग
४. नित्यबुद्धिः – ग
५. शुचिबुद्धिः – ग
६. सुखबुद्धि – ख, ग
७. अविद्या अस्यार्थः – ग
८. दुःखे दुःखसाधनेषु – ख
९. रपरा – ग
१०. कर्म सन्ध्यावन्दन – ख
११. प्रारब्धं सञ्चिता – ग
१२. फलभोगेन – ख, ग
१३. इत्युच्यते – क

पञ्चीकृतभूतानि स्थूलभूतानि। पञ्चीकरणं तु पूर्वोक्तानाम् आकाशादीनां तामसांशान् एकैकं द्विधा समं विभज्य तत्र[१] एकैकं चतुर्धा विभज्य स्वांशं परित्यज्य इतरांशेषु योजनम्। तेषां पृथ्वी मलमांसमनः। जलं मूत्रलोहितप्राणाः तेजो अस्थिमज्जावाक् "त्रिवृत्तं[२] तेषां त्रिवृत्तं एकैकं करवाणीति" त्रिवृत्तकरणश्रुतेः पञ्चीकरणस्यापि उपलक्षणत्वात् पञ्चीकरणं प्रामाणिकमेव।[३] "वैशेष्यात्तु तद्वादस्तद्वाद" इति न्यायेन स्वांशभूयस्त्वाविशेष-व्यपदेशोऽपि सम्भवति।[४] एवञ्च सति आकाशे शब्दोऽभिव्यज्यते। वायौ शब्दस्पर्शौ। तेजसि शब्दस्पर्शरूपाणि। जले शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूपरसगन्धाः। तथा च पञ्चीकृतपृथिव्याः ब्रह्माण्डमुत्पन्नं तदन्तर्वर्तिलोकाः चतुर्दश ब्रह्माण्डात् मनुशतरूपे जाते ब्रह्माण्डान्तवर्तिपृथिव्याः औषधयः उत्पन्नाः। औषधिभ्योऽन्नम्। पितृभ्यां भुक्तान्नपरिणामरेतःशोणितद्वारा स्थूलशरीरमुत्पन्नम्। तच्चतुर्विधम् — जरायुजमण्डज-स्वदेजमुद्भिजञ्चेति। मनुष्यादिशरीरं जरायुजम्। पक्षिपन्नगादिशरीरमण्डजम्। यूकादिशरीरं स्वेदजम्। तृणगुल्मादिशरीरम् उद्भिजम्। उक्तं स्थूलशरीरं पुनः प्रकारान्तरेण द्विविधम् — समष्टिव्यष्टिभेदात्। पञ्चीकृतपञ्चमहाभूत-तत्कार्यब्रह्माण्डतदन्तवर्तिकार्यं[५] सर्वं समष्टिरित्युच्यते। अथवा व्यक्तिषु गोत्वादिवत् सर्वव्यष्टिषु अनुस्यूतं पञ्चीकृतभूतकार्यं ब्रह्माण्डात्मकं व्यापकं समष्टिः वनवत्। सकलस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते। एतदुपहितं[६] चैतन्यं विराट् वैश्वानर इति चोच्यते। द्विविधं राजमानत्वात् सर्वनराभिमानत्वाच्च[७] प्रत्येकं स्थूलशरीरं गवादिव्यक्तिवद् व्यावृत्तं व्यष्टिरित्युच्यते। एतदुपहितं चैतन्यं विश्व इत्युच्यते। सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरप्रविष्टत्वात्। अनयोः समष्टिव्यष्ट्योः सामान्यविशेषयोरिव[८] तादात्म्याभ्युपगमात् तदुपहितवैश्वानरयोरपि तादात्म्यम्। एक एव जीवः जाग्रदवस्थायां[९] स्थूलसूक्ष्म-कारणाविद्याभिमानी सन् विश्व इत्युच्यते। स एव स्वप्नावस्थायां[१०] सूक्ष्मकारणाविद्याऽभिमानी सन् तैजस इत्युच्यते। स एव सुषुप्तौ

---

१. एकं चतुर्विधा – क, ख
२. तासां त्रिवृत्तं त्रिवृत्तम् एकैकं करवाणीति त्रिवृत्तकरण श्रुतेः – ख; तासां त्रिवृत्तं एकैकं करवाणीति त्रिवृत्तकरणा श्रुतेः – ग
३. वैशेष्यात् – क, ख
४. एवञ्च सति इत्यन्तो भागः क प्रतौ नास्ति।
५. कार्य समष्टिरिति – ग
६. चैतन्यं इति पदं ग प्रतौ नास्ति।
७. नराभिमानित्वाच्च – ग
८. तादात्म्यात् – क, ख
९. एव जाग्रदवस्थायाम् – क
१०. सूक्ष्मशरीरकारण – ख, ग

कारणविद्याभिमानी सन् प्राज्ञ इत्युच्यते। स एव शरीरत्रयाभिमानरहितः सन् शुद्धः परमात्मा भवति। तस्यैव अभिमानिनो जीवस्य अवस्थाः पञ्च — जाग्रत्स्वप्नसुषुप्ति-मूर्च्छामरणभेदात्।[१] दिगाद्यधिष्ठातृदेवतानुगृहीतैः इन्द्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था। जाग्रद्भोगप्रदकर्मोपरमे[२] सति जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था स्वप्नावस्था।[३] जाग्रत्स्वप्नयोरुभयोः भोगप्रदकर्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिका बुद्धेः कारणात्मनाऽवस्थितिः सुषुप्तिः। मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमावस्था[४] मूर्च्छावस्था। तदुक्तम् – "मुग्धेऽर्धसम्पत्तिः परिशेषादि"ति। एतच्छरीरभोगप्रापक कर्मोपरमेण द्विविधदेहाभिमान-निवृत्त्या[५] संपिण्डीतकरणग्रामाऽवस्था भाविशरीरप्राप्तिपर्यन्तं मरणावस्था। केचित्तु[६] अस्या उक्तावस्थासु अन्तर्भावं वदन्ति। अत्र श्रुतिस्मृतिप्रमाणानि[७] प्रसिद्धानि।[८] एवम् एक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीर[९]-तत्कारणमायोपहितस्सन् वैश्वानर इत्युच्यते। अहमेव वैश्वानरोऽस्मि इत्येतदुपासनया तत्प्राप्तिः फलं भवति, वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां[१०] श्रुत्यर्थस्य तथा प्रतिपादनात्। स एव परमात्मा[११] समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन् हिरण्यगर्भ इत्युच्यते। एतदुपासनया तत्प्राप्तिः फलं भवति, "अन्तर उपपत्तेः" इत्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्याम् उपकोशलविद्यायां तथैव प्रतिपादनात्। स एव केवलमायोपाधिकः सन् ईश्वर इत्युच्यते। तदुपासनया[१२] तत्प्राप्तिः फलं भवति। "सर्वत्र प्रसिद्धोपदेशात्" इति शाण्डिल्यविद्यायां "दहर उत्तरेभ्यः" इति दहरविद्यायाञ्च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया[१३] तत्प्राप्तेः प्रतिपादनात् "तं यथा यथोपासते तत् तथैव भवति" इति श्रुतेश्च।[१४] भावनामान्द्ये तु तत्तारतम्येन सार्ष्टिसारूप्यसामीप्यसालोक्यफलानि भवन्ति,

---

१. दिगाद्यधिष्ठानदेवता – क, ख
२. च – क
३. जाग्रत्स्वप्नोभयभोग – क
४. कर्मोपरमे – ख
५. सपिण्डीकरण – ग
६. अस्या एव उक्तावस्थासु – ख
७. पुराणानि – ख
८. एक एव – क
९. तत्कारणोपहितस्सन् – ख
१०. काराभ्याम् एवमेव श्रुत्यर्थस्य प्रतिपादनात् – ग
११. समष्टिशरीर – ख
१२. तत्फलं – क
१३. तत्प्राप्ति प्रतिपादनात् – ग
१४. भावनामान्द्ये तत्तारतम्ये – ग

"[1]साम्नः सायुज्यं सलोकतां जयति" इत्यादिश्रुतेः। ये पुनः साधनचतुष्टय- सम्पन्नाः विचारासमर्थाः मन्दप्रज्ञाः तेषां गुरुमुखात् ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दलक्षणं ब्रह्माहमस्मि इति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे[2] जीवावस्थायां मरणावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिः फलं भवति, श्रुतिन्यायसाम्यात्। "ओमित्येतेनैवाक्षरेण परं पुरुषम् अभिध्यायीत स एतस्मात् जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते," ओमित्यात्मानं युञ्जीत, "ओमित्येवं ध्यायन् यथात्मानम्" इत्यादि श्रुतिभ्यः। भगवताऽप्युक्तम्–

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम्।। इति

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।। इति च।

एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणः तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितम्। अयमेव अध्यारोप इत्युच्यते। अस्यापवाद इदानीम् उच्यते —

अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेण अभावनिश्चयः। यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किन्तु शुक्तिः इत्यभावनिश्चयः। अयमेव बाधो विलापनम् इति चोच्यते। स बाधस्त्रिविधः शास्त्रीयो यौक्तिकः प्रत्यक्षश्चेति। "अथात आदेशो नेति नेति," "नेह नानास्ति किञ्चन" इत्यादि शास्त्रात् ब्रह्म[3]व्यतिरेकेण निखिलप्रपञ्चाभावनिश्चयः शास्त्रीयो बाधः। मृद्व्यतिरेकेण घटाभावनिश्चयवत् निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपञ्चाभावं निश्चित्य दृश्यमानस्य[4] मिथ्यात्वनिश्चयेन ब्रह्मात्ममात्र[5]निश्चयो यौक्तिको बाधः। "अहं ब्रह्मास्मी"ति तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेण अज्ञानतत्कार्यनिवृत्तिः प्रत्यक्षो बाधः। यौक्तिकबाधस्य अयं क्रमः – स्थूलप्रपञ्चं सर्वमपि स्थूलभूतेषु विलाप्य तद्व्यतिरेकेण तन्नास्ति इति निश्चित्य स्थूलभूतानि समष्टिव्यष्टिसूक्ष्मशरीरञ्च सूक्ष्मभूतेषु [6]विलाप्य तथा पृथिवीमप्सु

---

१. साम्नः इति पदं ख प्रतौ नास्ति।
२. जीवदवस्थायाम् – क, ग
३. व्यतिरेकेण प्रपञ्चाभावनिश्चयः – क, ग
४. मिथ्यात्मनिश्चयेन – ग; मिथ्यात्वेन – क
५. मात्रत्व निश्चयो – ग; ब्रह्मात्वमात्रत्वम् – क
६. विलाप्य तद्व्यतिरेकेण तन्नास्तीति तत्रापि पृथिवीम् – ग

विलाप्य अपः तेजसि तेजो वायौ वायुमाकाशे आकाशमज्ञाने अज्ञानं चिन्मात्रे विलापयेत्। तथा च स्मृतिः –

जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते।।
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन् निष्कलं सम्प्रलीयते।। इति

उक्तञ्च —

अकारं पुरुषं विश्वमुकारे प्रविलापयेत्।
उकारं तैजसं सूक्ष्ममकारे प्रविलापयेत्।।
मकारं कारणं प्राज्ञं चिदात्मनि[1] विलापयेत्।। इति

आभ्यामध्यारोपापवादाभ्यां तत्त्वं पदार्थ[2]शोधनमपि सिद्धं भवति। तथा हि — मायादिसमष्टिस्तदुपहितचैतन्यम् एतदाधारानुपहितम् अखण्डचैतन्यञ्च तप्तायःपिण्डवत् एतत्रयम् अविविक्तम् एकत्वेनावभासमानं तत्पदवाच्यार्थो भवति। विविक्तमखण्डचैतन्यं तत्पदलक्ष्यार्थो भवति। अविद्यादिव्यष्टिः तदुपहितं चैतन्यम् एतदाधारानुपहितं प्रत्यक्चैतन्यम् एतत्त्रयं तप्तायःपिण्डवत् अविविक्तम् एकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति। विविक्तं प्रत्यक्चैतन्यं त्वंपदलक्ष्यार्थो भवति। एतौ लक्ष्यार्थौ उपादाय सम्बन्धत्रयेण सहितं तत्त्वमस्यादिवाक्यं लक्षणया अखण्डार्थ बोधकं भवति। सम्बन्धत्रयं तु पदयोः सामानाधिकरण्यम्। सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानां शब्दानाम् एकस्मिन्नर्थे वृत्तिः। यथा – "सोऽयं देवदत्तः" इत्यत्र तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य च एकस्मिन् देवदत्तपिण्डे वृत्तिः सामानाधिकरण्यम्। पदार्थयोः विशेषणविशेष्यभावः। यथा तत्रैव सशब्दार्थतत्काल-विशिष्टायंशब्दार्थे तत्कालविशिष्टयोः अन्योन्य[3]भेदव्यावर्तकतया विशेषणविशेष्यभावः। "सोऽयम् अयं सः" इति पदयोः अर्थयोः वा [4]अविरुद्धवाक्यार्थेन सह लक्ष्यलक्षणभावः। यथा तत्रैव सोऽयं इत्यादि वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा अविरुद्धदेवदत्तपिण्डेन वाक्यार्थेन

१　विलापयेदाभ्याम् – ग
२. मंशोधनम् – क
३. भावव्यावर्तकतया – ख
४. अविरुद्ध देवदत्तपिण्डेन वाक्यार्थेन – क

सह लक्ष्यलक्षणभावः। तथा तत्त्वमस्यादिवाक्ये तत्त्वंपदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीववाचकयोः अखण्डचैतन्ये तात्पर्येण वृत्तिः सामानाधिकरण्यम्। तथा तत्त्वंपदार्थयोः ईश्वरजीवयोः अन्योन्यभेदव्यावर्तकतया "तत्त्वमसि," "त्वं तदसि" इति विशेषणविशेष्यभावः। तथा तत्त्वंपदयोस्तदर्थयोर्वा वाक्यार्थेन अविरुद्धाखण्डचैतन्येन सह विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः। तदुक्तम्–

सामानाधिकरण्यञ्च विशेषणविशेष्यता।
लक्ष्यलक्षणभावश्च पदार्थप्रत्यगात्मनाम्।। इति

अस्यार्थः तु उक्त एव। एतदभिप्रायेण वाक्यवृत्तावप्युक्तम् –

तत्त्वमस्यादिवाक्यञ्च तादात्म्यप्रतिपादने।
लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते।। इति

तादात्म्यप्रतिपादने अखण्डस्वरूपप्रतिपादने इत्यर्थः। [१]संसर्गस्य वा विशिष्टस्य वा प्रत्यक्षादिविरुद्धत्वेन तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वायोगात्। अखण्डत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वम्। सर्वस्य प्रपञ्चस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वात् विजातीयभेदशून्यता। जीवपरमात्मनोरत्यन्तैक्यात् सजातीयभेदशून्यता। एकरसत्वात् स्वगतभेदशून्यता। अथवा त्रिविधपरिच्छेदशून्यत्वम् अखण्डत्वं विभुत्वात् देशपरिच्छेदशून्यत्वम्। नित्यत्वात् कालपरिच्छेदशून्यत्वम्। सर्वात्मकत्वात् वस्तुपरिच्छेदशून्यत्वम्। "वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात्" इत्यादिश्रुतेः। यद्वा अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वमखण्डत्वम्। तदुक्तम् —

अविशिष्टमपर्यायानेकशब्दप्रकाशितम्।
एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे।। इति

एवं तत्त्वमस्यादिवाक्यजन्याखण्डाऽपरोक्षज्ञानात् अज्ञाननिवृत्तिः आनन्दावाप्तिश्च।

तदुक्तम् —

प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः।।
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदेव हि।।

---

१. असंसर्गस्य – ख

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते।। इति

अन्योन्यतादात्म्य प्रतिपत्तिः, अहं ब्रह्मास्मीति ब्रह्मैवाहमस्मीति अखण्डाकारवृत्तिः। तया वृत्त्या अज्ञाने निवृत्ते अब्रह्मत्वपरोक्षत्वादीनां निवृतत्त्वात् प्रत्यगात्मनः अखण्डानन्दस्वरूपावस्थितिर्भवति इति [१]श्लोकतात्पर्यार्थः।

इति प्रथमपरिच्छेदः समाप्तः।।

---

१. श्लोकार्थः – ग

।। अथ द्वितीयः परिच्छेदः ।।

वृत्तिर्नाम [१]विषयचैतन्याभिव्यञ्जको अन्तःकरणाज्ञानयोः परिणामविशेषः। अभिव्यञ्जकत्वं नाम अपरोक्षव्यवहारजनकत्वम् आवरणनिवर्तकत्वं वा। परिणामो नाम उपादानसमसत्ताको अन्यथाभावः, उपादानविषयसत्ताको अन्यथाभावो विवर्त इति भेदात् अनयोः परिणामविवर्तयोः वृत्तिः। उपादानान्तःकरणाज्ञानापेक्षया परिणामः चैतन्यापेक्षया विवर्तः इति न सिद्धान्तविरोधः। "तन्मनो कुरुते" इत्यादि श्रुत्या अन्तःकरणस्य कार्यद्रव्यत्वेन सावयवतया [२]परिणामित्वोपपत्तिः। सा च वृत्तिर्द्विविधा – प्रमाऽप्रमाभेदात्। तत्र बोधेच्छा वृत्तिः, वृत्तीच्छा बोधो वा प्रमा। सा च द्विविधा – ईश्वराश्रया जीवाश्रया चेति। तत्र ईक्षणापरपर्याया स्रष्टव्यविषयाकारमायावृत्तिप्रतिबिम्बितचिदीश्वराश्रया।

"तदैक्षत [३]बहु स्यां प्रजायेये" इत्यादिश्रुतेः। अनधिगताबाधितविषयाकारान्तः-करणवृत्तिप्रतिबिम्बितं चित् द्वितीया। ब्रह्मात्मैक्यप्रमायाः तथात्वान्ताऽसम्भवः। प्रपञ्चस्य संसारदशायाम् अबाधितत्वात् तत्प्रमायां नाव्याप्तिः। शुक्तिरजतादेः [४]ज्ञातसत्ताकत्वेन अज्ञातसत्ताकत्वाभावात् नातिव्याप्तिः। तत्करणं प्रमाणम्। सा जीवाश्रया। प्रमा द्विविधा— पारमार्थिकी व्यावहारिकी चेति। [५]तत्त्वमस्यादिवाक्यजन्यप्रमा पारमार्थिकी। सा च निरूपिता, अग्रे निरूपयिष्यते। प्रपञ्चप्रमा व्यावहारिकी। सा च षड्विधा — प्रत्यक्षानुमित्युपमितिशब्दार्थापत्त्यभावप्रमाभेदात्। तत्र विषयचैतन्याभिन्नं प्रमाणचैतन्यं प्रत्यक्षप्रमा।

---

१. विषये – ख
२. परिणामित्वोपपत्तेः – क
३. वरूण्यां – ग
४. ज्ञातव्यसत्ता – क; ज्ञातैकसत्ता –
५. तत्वमस्यादि – ग

तथा हि एकमेव चैतन्यम् उपाधिभेदात् चतुर्विधम् — प्रमातृचैतन्यं, प्रमाणचैतन्यं, विषयचैतन्यं, फलचैतन्यञ्चेति। तत्र अन्तःकरणविशिष्टचैतन्यं प्रमातृचैतन्यम्। अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यम्। घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्। अन्तःकरणवृत्त्यभिव्यक्तचैतन्यं फलचैतन्यम्। तत्र वृत्तिविषययोः युगपदेकदेशावस्थाने तदुपहितचैतन्ययोरपि अभेदो भवति। तथा हि तडागोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुष्कोणाद्याकारेण यथा परिणमते तथा इन्द्रियार्थसन्निकर्षानन्तरम् अन्तःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन सह संयुज्यते। पश्चात् तदाकारेण परिणमते। सेयं परिणामवृत्तिः। तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति। तदा वृत्तिविषययोः युगपदेकदेशस्थत्वेन तदुपहितभेदाप्रयोजकत्वात् प्रमाणचैतन्यं विषयचैतन्याभिन्नं भवति। सेयं प्रत्यक्षप्रमा। तत्र वृत्त्या आवरणं [१]निवर्तते। चैतन्येनाज्ञानं निवर्तते। प्रमया वा सावरणमज्ञानं निवर्तते। ततो विषयः स्फुरति साक्षिणा। अन्तःकरणोपहितचैतन्यं साक्षी। सेयं प्रत्यक्षप्रमा द्विविधा — बाह्यप्रमा आन्तरप्रमा चेति। तत्र बाह्यप्रमा शब्दस्पर्शरूपरसगन्धविषयभेदात् पञ्चविधा। तत्करणानि श्रोत्रादिज्ञानेन्द्रियाणि पञ्च। आन्तरप्रमा द्विविधा — आत्मगोचरा सुखादिगोचरा चेति। आत्मगोचरा द्विविधा — विशिष्टात्मविषया शुद्धात्मविषया चेति। अहं जीवः इत्यादि विशिष्टात्मविषया। अहं ब्रह्मास्मीति [२]शुद्धात्मविषया चेति। [३]अहं सुखी इत्यादि [४]सुखात्मविषया। अन्तरिन्द्रियं मनः [५]अन्तःप्रमाकरणम् [६]इति वाचस्पतिमिश्राः आचार्यास्तु एवं वर्णयन्ति।

इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः।
इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मनः ।। इति

श्रुतिस्मृतिभ्यां मनसः इन्द्रियेभ्यः पृथक्करणात् मनो नेन्द्रियं वृत्तिं प्रति उपादानत्वात् न करणं मनः। सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वेन अप्रमात्वम् इष्टमेव। अत एव अन्तःकरणतद्धर्माणां शुक्तिरजतादिवत् [७]प्रतीतिकत्वं शुद्धात्मसाक्षात्कारस्य वेदान्तवाक्यजन्यत्वात् प्रमात्वम्। [८]वाक्यस्य अपरोक्षज्ञानजनकत्वं वक्ष्यते। इति प्रत्यक्षप्रमाणम्।। लिङ्गज्ञानजन्यं ज्ञानम् अनुमितिः। व्याप्त्याश्रयो लिङ्गम्। साधनसाध्ययोः

---

१. अत्र इदं पदं नास्ति – क, ख
२. शुद्धा विषया – ख।
३. मयि सुखम् – ख, ग
४. सुखादि – ख, ग
५. अन्तरप्रमा – ग।
६. इति पदं न दृश्यते – क।
७. प्रातिभासिकत्वम् – ख।
८. शक्यस्य – ग

नियतसामानाधिकरण्यं व्याप्तिः। प्रतिबन्धकाभावे सति सहचारदर्शनेन सा व्याप्तिर्गृह्यते। तस्यां गृहीतायां लिङ्गज्ञानेन व्याप्त्यनुभवजन्यसंस्कारोद्बोधे सति अनुमितिर्जायते। इयं स्वार्थानुमितिः। परार्थानुमितिस्तु न्यायसाध्या। न्यायो अवयवसमुदायः। अवयवास्त्रयः— [१]प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपा वा। तथा हि "जीवः परस्मान्न भिद्यते सच्चिदानन्दलक्षणत्वात् परमात्मवत्" इत्यत्र जीवः परस्मान्न भिद्यते इति प्रतिज्ञा। सच्चिदानन्दलक्षणत्वं हेतुः। इदमेव लिङ्गमित्युच्यते। यः सच्चिदानन्दलक्षणः सः परस्मान्न भिद्यते यथा परमात्मा इत्युदाहरणम्। अहमस्मि [२]इति जानामि इति कदापि अप्रियो न भवामि इति अनुभवात् जीवस्य सच्चिदानन्दलक्षणत्वात्। अतो न हेत्वसिद्धिः। "सत्यं ज्ञानमनन्तं ब्रह्म," "आनन्दो ब्रह्मेति व्यजानात्" इत्यादिश्रुत्या ब्रह्मणः सच्चिदानन्दलक्षणत्वम्। अतो न दृष्टान्तासिद्धिः। [३]एवं गुरुमुखात् श्रुतवेदान्तस्य शोधितत्वं पदार्थस्य स्वस्मिन् सच्चिदानन्द[४]लक्षणत्वदर्शनात् अहं ब्रह्मेति ब्रह्माभिन्नानुमितिरुत्पद्यते। न च औपनिषदस्य ब्रह्मात्मैकस्य अनुमानगम्यत्वानुपपत्तिर्मन्तव्या इति मननविधानात् वेदान्तस्य सहकारित्वेन अनुमानप्रमाणस्वीकारात्। परार्थानुमितिस्तु न्यायोपदेशेन उत्पद्यते। न्यायो दर्शितः। एवं ब्रह्मव्यतिरिक्तस्य प्रपञ्चस्य मिथ्यात्वसाध्यानुमितिः दृश्यत्वादिहेतुभिरुत्पद्यते। मिथ्यात्वं नाम अनिर्वचनीयत्वम्। दृश्यत्वं नाम चैतन्यविषयत्वम्। अतो न ब्रह्मणि व्यभिचारः। तच्च अनुमानम् [५]अन्वयव्यतिरेकरूपम् एकमेव न तु केवलान्वयि। अस्मिन् मते ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन तदप्रतियोगित्वरूपकेवलान्वयित्वस्य अप्रसिद्धेः। नापि व्यतिरेकी। साधनेन साध्यानुमितौ साध्याभावसाधनाभावव्याप्तिज्ञानस्य अनुपयोगात्। अन्वयव्याप्तिमविदुषः साध्यप्रमा अर्थापत्तिप्रमाणात् इति वक्ष्यते।। इत्यनुमानम्।। सादृश्यप्रमितिरूपमिति वाक्य[६]करणिकाप्रमा शाब्दी। आकाङ्क्षायोग्यतासन्निधिमत्पदसमुदायो वाक्यम्। [७]अन्वयानुपपत्तिः आकाङ्क्षा। [८]वाक्यार्थावबोधो योग्यता। अविलम्बेन उच्चारणं सन्निधिः। अव्युत्पन्नस्य

---

१. अतिज्ञा – ग; प्रत्यज्ञा – क।
२. इति ज्ञानामि इत्यन्तो भागः 'ख' प्रतौ न दृश्यते।
३. एवं – न दृश्यते – ख।
४. लक्षणदर्शनात् – क, ग।
५. अन्वयरूपम् एकमेव – क, ग।
६. कर्णिका – ग।
७. अन्वया उपपत्तिः – ख।
८. वाक्यार्थाबाधः – ग।

सङ्गतिग्रहाभावान्न वाक्यार्थप्रमा। पदपदार्थयोः स्मार्यस्मारकभावः सङ्गतिः। सा द्विविधा — शक्तिर्लक्षणा चेति। शक्तिर्नाम मुख्या वृत्तिः पदपदार्थयोः वाच्यवाचक- भावसम्बन्ध इति यावत्। सा च द्विविधा — योगो[१]रूढश्चेति। अवयवशक्तिर्योगः। यथा पाचकादिपदानाम्। रूढिः समुदायशक्तिः यथा घटादिपदानाम्। सा च व्यवहारादिना गृह्यते। तथा हि — उत्तमवृद्धस्य 'घटमानय' इति वाक्यश्रवणानन्तरं मध्यमवृद्धः प्रवर्तते। बालः तत्प्रवृत्तिं दृष्ट्वा ज्ञानम् अनुमिनोति। [२]तथा हि इयं प्रवृत्तिः ज्ञानसाध्याप्रवृत्तित्वात् मदीयप्रवृत्तिवत् इति ज्ञानम् अनुमाय तस्य वाक्यजन्यत्वम् अनुमिनोति इति। इदं ज्ञानम् एतद्वाक्यजन्यम् एतद्वाक्यान्वय-व्यतिरेकानुविधायित्वात् दण्डजन्यघटादिवत् इत्यनन्तरम् आवापोद्वापाभ्यां घटपदस्य घटव्यक्तौ शक्तिमवधारयति। सा च शक्तिः पदार्थः इति नैयायिकाः। कार्यान्विता इति मीमांसकाः। अन्विता इति वेदान्तिनः। एवं व्याकरणादिनापि [३]शक्तिः गृह्यते। उक्तं च–

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।। इति

लक्षणा शक्यसम्बन्धः। सा च द्विविधा — केवललक्षणा लक्षितलक्षणा चेति। केवला त्रिविधा — जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। शक्यार्थपरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिः जहल्लक्षणा। यथा 'गङ्गायां घोषः' [४]इत्यत्र गङ्गापदस्य [५]तीरे लक्षणा। शक्यार्थापरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिः अजहल्लक्षणा [६]यथा 'मञ्चाः क्रोशन्ति' इत्यत्र मञ्चपदस्य मञ्चस्थपुरुषे शक्यार्थापरित्यागे तदाश्रयग्रहणम् अजहल्लक्षणा। यथा 'शोणो धावति' इत्यत्र शोणपदस्य शोणगुणविशिष्टेषु वा अश्वादिद्रव्येषु शक्यैकदेशपरित्यागेन एकदेशे वृत्तिः जहदजहल्लक्षणा इत्युच्यते। इयमेव [७]भागत्यागलक्षणा इत्युच्यते। यथा 'सोऽयं देवदत्तः' इत्यत्र 'सोऽयम्' इति पदयोः केवलदेवदत्तपिण्डे। यथा 'तत्त्वमसि' इत्यत्र 'तत् त्वं' पदयोः अखण्डचैतन्ये। शक्यपरम्परासम्बन्धो लक्षितलक्षणा। यथा द्विरेफपदस्य मधुकरे। गौण्यपि लक्षितलक्षणैव। एवं व्युत्पन्नस्य गृहीतसङ्गतिकवाक्यात् वाक्यार्थस्य प्रमोत्पत्तौ आकाङ्क्षा योग्यता आसत्तिः तात्पर्यज्ञानं

---

१. रूढिश्चेति – ख।
२. तथा हि इवं प्रवृत्तिः इत्यारभ्य शक्तिमवधारयति इति पर्यन्तम् व्यत्यासो दरीदृश्यते – ख।
३. शक्तिपदं न दृश्यते – क।
४. इत्यत्र इति पदम् न दृश्यते – क।
५. तीरे लक्षणा इति पदद्वयं न दृश्यते – ख, ग।
६. यथा मञ्चाः ..... अजहल्लक्षणा इति पर्यन्तो भागः अदृश्यते – क।
७. भागलक्षणा इति – ख, ग।

चेति चत्वारि कारणानि। आकाङ्क्षायोग्यते निरूपिते। शक्तिलक्षणान्यतरसम्बन्धेन अव्यवधानेन पदजन्यपदार्थोपस्थितिः आसत्तिः तात्पर्यं द्विविधम् — वक्तृतात्पर्यं शब्दतात्पर्यञ्चेति। पुरुषाभिप्रायो वक्तृतात्पर्यम्। तज्ज्ञानं वाक्यार्थज्ञाने न कारणं तदभावेऽपि अव्युत्पन्नस्य वाक्याद्वाक्यार्थज्ञानदर्शनात्। तदितरप्रतीतिमात्रेच्छया अनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यम्। तच्च षड्विधैः लिङ्गैः निश्चीयते। वेदे लिङ्गानि तु दर्शितानि।

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।। इति

अस्यार्थः–प्रकरणप्रतिपाद्यस्य अद्वितीयवस्तुनः आद्यन्तयोः प्रतिपादनम् उपक्रमोसंहारौ। यथा छान्दोग्ये षष्ठे 'सदेव सौम्य इदमग्र आसीत्' 'एकमेवाद्वितीयं ब्रह्म' 'ऐतदात्म्यमिदं सर्वम्' इत्युपक्रमोपसंहारौ आद्यन्तयोः। प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनम् अभ्यासः। यथा तत्रैव 'तत्त्वमसी'ति नवकृत्वोऽभ्यासः। प्रकरणप्रतिपाद्यस्य मानान्तरेण अविषयता अपूर्वता। यथा तत्रैव अद्वितीयवस्तुनो मानान्तराविषयता अपूर्वता। [१]प्रकरणप्रतिपाद्यस्य श्रूयमाणं तत् ज्ञानात् [२]तत्प्राप्तिप्रयोजनं फलम्। यथा तत्रैव आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं [३]यावन्न विमोक्ष्ये अथ सम्पत्स्ये इति अद्वितीय-वस्तुज्ञानात् तत्प्राप्तिः फलम्। प्रकरणप्रतिपाद्यस्य प्रशंसनम् अर्थवादः। यथा तत्रैव "येनाश्रुतं श्रुतं भवति [४]अमतं मतं भवति अविज्ञातं ज्ञातम्" इत्यद्वितीयवस्तुप्रशंसनम्। प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनम् उपपत्तिः यथा तत्रैव 'सौम्यैकेनमृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्।' 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादिवाक्य-प्रतिपादितमृदादिदृष्टान्तैः अद्वितीयवस्तुप्रतिपादनम्। एवं षड्विधं तात्पर्यं लिङ्गैः वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यनिश्चयः। इदमेव श्रवणम् इत्युच्यते। श्रुतस्य अर्थस्य उपपत्तिभिः चिन्तनं मननम्। विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनम्। तदुक्तम् –

शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः।
वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्यते।।

---

१. इदं पदं न दृश्यते – ग।
२. तत्प्राप्ति इदं पदं न दृश्यते – ख।
३. यावन्नाविमोक्षेऽथ सम्पत्स्यते – क।
४. अमतं मतं भवति इति पदं न दृश्यते – ग।

चेतसस्तु चितिमात्रशेषता ध्यानमित्यपि वदन्ति वैदिकाः।
अन्तरङ्गमिदमित्थमीरितं तत्कुरुष्व परमात्मबुद्धये।। इति

इदं श्रवणादित्रयम् [१]अद्वितीयसाधनसम्पन्नस्य संन्यासिनः ज्ञानं प्रति अन्तरङ्गसाधनम्, 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुतेः। साधनानि नित्यानित्य-वस्तुविवेक इहामुत्रार्थफलभोगविरागः शमदमादिषट्कसम्पन्मुमुक्षुत्वं च इत्येवंरूपाणि। "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाधिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्, कश्चिद्धीरः प्रत्यगात्मानमैक्षत आवृत्तचक्षुः अमृतत्वम् इच्छन् शान्तो दान्त उपरतस्तितिक्षुः[२] समाहितो भूत्वा आत्मन्येव आत्मानं पश्यति।" इत्यादिश्रुतिभ्यः यथोक्तसाधनसम्पन्नस्य संन्यासाधिकारः। विहितानां कर्मणां विधिना परित्यागः संन्यासः। स च वैराग्यहेतुकः, 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इत्यादिश्रुतेः। 'वैराग्यं परम् एतस्य मोक्षस्य परमो विधिः' इति स्मृतेश्च। स वैराग्यतारतम्येन चतुर्विधः — कुटीचकबहूदकहंसपरमहंसभेदात्। वैराग्यं द्विविधम् – अपरं परं चेति। तत्र अपरं चतुर्विधम् — यतमानव्यतिरेकैकेन्द्रियत्ववशीकारभेदात्। अस्मिन् संसारे इदं सारम् इदम् असारम् इति सारासारविवेको यतमानवैराग्यम्। चित्तगतदोषाणां मध्ये एतावन्तः पक्काः एतावन्तो अपक्काः इति विविच्य अपक्कदोषनिरोधे यत्नो व्यतिरेकवैराग्यम्। विषयेच्छासत्त्वेऽपि मनसि इन्द्रियनिरोधावस्थानम् एकेन्द्रियत्ववैराग्यम्। वशीकारवैराग्यम् ऐहिकामुष्मिकविषयजिज्ञासा। तदुक्तम् —

दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् इति।

तन्त्रिविधम् — मन्दं तीव्रं तीव्रतरं चेति। पुत्रदारादिवियोगे धिक् संसारम् इति बुद्ध्या विषयजिहासा मन्दवैराग्यम्। अस्मिन् जन्मनि पुत्रादारादि मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रम्। पुनरावृत्तिसहित[३]ब्रह्मलोकादिपर्यन्तम् मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रतरम्। तत्र मन्दवैराग्ये संन्यासाधिकार एव नास्ति।

यदा मनसि वैराग्यं जायते सर्ववस्तुषु।
तदैव सन्यासेद्विद्वान् अन्यथा पतितो भवेत्।।

इति स्मरणात्। तीव्रवैराग्ये सति यात्राद्यशक्तौ कुटीचके अधिकारः। तच्छक्तौ

---

१. अद्वितीय इति पदं अदृश्यते – ख, ग।
२. तितिक्षुः श्रद्धावित्तः समाहितो इति पाठः अधिकं दृश्यते – ख।
३. रहित – ख।

बहूदकसंन्यासाधिकारः। तीव्रतरवैराग्ये सति हंससंन्यासाधिकारः। एते त्रयः संन्यासाः। एतेषाम् आचाराः स्मृतौ प्रसिद्धाः। तीव्रतरवैराग्ये सति मुमुक्षोः परमहंससंन्यासाधिकारः। स च परमहंसो द्विविधः—विविदिषासंन्यासो विद्वत्संन्यासश्चेति। साधनसम्पन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणस्संन्यासः विविदिषासंन्यासः। "एतमेव प्रव्रजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यादिश्रुतिः तत्र प्रमाणम्। स च द्विविधः — जन्मापादककर्मत्यागात्मकः प्रैषोच्चारणपूर्वकं दण्डधारणाद्याश्रमरूपश्चेति। "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इत्यादिश्रुतिः आद्ये मानम्। विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्यासप्रतिबन्धे [१]आदिसंन्यासे अधिकारः। अत्र स्त्रीणामप्यधिकारः; जनकादीनां मैत्रेयीप्रभृतीनां च तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषु उपलम्भात्। द्वितीये तु दण्डमाच्छादनं कौपीनं [२]परिगृह्णीतशेषं विसृजेत्। "संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजन्ति [३]अकृतोद्वाहाः परं वैराग्यमाश्रिताः" इत्यादिवचनानि प्रमाणानि। गृहस्थाश्रमादौ कृतश्रवणादिभिः उत्पन्नब्रह्मसाक्षात्कारेण गृहस्थादिना [४]विक्षिप्तचित्ताविश्रान्तिलक्षणं जीवन्मुक्तिमुद्दिश्य क्रियमाणस्संन्यासो विद्वत्संन्यासः। तत्र 'एतमेव विदित्वा मुनिर्भवति' अथ योगिनां परमहंसानाम् इत्यादि परमहंसोपनिषत् –

यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम्।
[५]तदेव दण्डं संगृह्य सोपवीतां शिखां त्यजेत्।।

इत्यादि श्रुतिः। स्मृतिवचनानि प्रमाणानि। तत्र आद्यसंन्यासो [६]जन्मान्तरीयेऽपि ज्ञाने उपकरोति; जनकादीनां तत्त्वज्ञानोपलम्भात्। श्रुत्यादिषु "यदि आतुरः स्यात् मनसा वाचा वा संन्यासेत् इत्यातुरसंन्यासविधानात्। आतुरेऽपि विरक्तस्यैव अधिकारात् न संन्यासान्तरम् अन्यथा प्रकरणविरोधप्रसङ्गात्। तदुक्तम् –

जन्मान्तरेषु यदि साधनजातमासीत् संन्यासपूर्वकमिदं श्रवणादिकं च।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र तत्राश्रमादिषु वसन्न निवारयामः।।

तदेव पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकारणत्वम् अन्वयव्यतिरेकाभ्यां निश्चीयते।

---

१. आद्यम् – ग।
२. परिग्रहेत् – ख, ग।
३. अकृतोद्वाल्यः – ग।
४. विक्षिप्त इति पदं न दृश्यते – ख, ग।
५. तदेक – ग।
६. जन्मान्तरीयोऽपि – क, ख।

अर्हार्थे श्रोतव्य इति तव्यप्रत्ययः इति वाचस्पतिमिश्राः। आचार्यास्तु एवं वर्णयन्ति यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवाक्यैः दर्शनमुद्दिश्य मनननिदिध्यासनाभ्यां फलोपकार्याङ्गाभ्यां श्रवणं नाम अङ्गी विधीयते। तस्य च दृष्टफलत्वात् न अपूर्वविधिः। अप्राप्तार्थविधायको ह्यपूर्वविधिः। किन्तु नियमविधिर्वा परिसङ्ख्याविधिर्वा। पक्षे प्राप्तस्य अप्राप्तांश[१]पूरको विधिः नियमविधिः। यथा "व्रीहीन् अवहन्यात्" इत्यवघातविधिः। उभयप्राप्तौ इतरव्यावृत्ति बोधको विधिः परिसङ्ख्याविधिः। यथा "इमामगृभ्णन् रशनामृतस्य इति अश्वाभिधानीम् आदत्ते" इति गर्दभरशनाग्रहणव्यावृत्तिविधिः। एवं प्रकृतेऽपि 'जिज्ञासुः वेदान्तश्रवणमेव कुर्यात्' इति नियमविधिः। "वेदान्तश्रवणव्यतिरिक्तं न कुर्यात्" इति परिसंख्याविधिर्वा। तदुक्तम् –

नियमः परिसंख्या वा विध्यर्थोऽस्य भवेद्यतः।
अनात्मादर्शनेनैव परात्मानमुपास्महे।। इति

तच्च श्रवणं संन्यासिनां नित्यम्। "नित्यकर्म परित्यज्य वेदान्तश्रवणं विना। वर्तमानस्तु संन्यासी पतत्येव न संशयः" इत्यकरणे प्रत्यवायश्रवणात्। "आ सुप्तेरा मृतेः कालं नयेत् [२]वेदान्तचिन्तनात् इति स्मृत्या 'यावज्जीवम् अग्निहोत्रं जुहुयात्' इत्यादिश्रुत्या जीविनं निमित्तीकृत्य अग्निहोत्रादिविधानवत् जीवनं निमित्तीकृत्य [३]श्रवणादिविधानात्। 'त्वंपदार्थविवेकाय सन्यासः सर्वकर्मणाम्' श्रुत्या विधीयते [४]यस्मात् तत्त्यागी [५]पतितो भवति, इति।

कारकस्य करणेन [६]तत्क्षणाद्भिक्षुरेव पतितो यथा भवेत्।
व्यञ्जकस्य परिवर्जनादसौ सद्य एव पतितो न संशयः।। इति

वार्त्तिकाचार्यसङ्क्षेपशारीरकाचार्याभ्यां श्रवणादिरहितस्य संन्यासिनः पातित्याभिधानाच्च। गृहस्थादीनां [७]श्रवणादिकाम्यं [८]फलं दिने दिने तु वेदान्तश्रवणात् भक्तिसंयुतात्

---

१. पूर्वको – ग।
२. वेदान्तचिन्तया इति – ख, ग।
३. श्रवणविधानात् – क. ख
४. तस्मात् – क।
५. लतिको – ग।
६. तत्क्षणाद्भिक्षुरेषु – ख।
७. श्रवणम् – क।
८. फलं इति पदं न दृश्यते – ख, ग।

गुरुशुश्रूषया लभ्यात्[1] कृच्छ्राशीतिफलं लभेत्[2] इति फलश्रवणात्। अन्ये तु वेदान्तश्रवणे साधनचतुष्टयसम्पन्नस्यैव[3] अधिकारात् गृहस्थादेः श्रवणाधिकार एव नास्ति। श्रुतिषु याज्ञवल्क्यजनकप्रभृतीनां[4] तत्त्वज्ञानप्रतिपादकोपाख्यानस्य ब्रह्मात्मनि तात्पर्यं स्वार्थे तात्पर्यमेव नास्ति इत्याहुः। तदसत्[5] परं वैराग्यं गुणवैतृष्ण्यं गुणेषु जिहासा[6] इति यावत्। तदुक्तं तत्परं पुरुषख्यातेः गुणवैतृष्ण्यमिति। तच्च असम्प्रज्ञातसमाधेः अन्तरङ्गसाधनम्।

उक्तं च – "तीव्रसंवेगानामासन्नः[7] समाधिलाभः" इति। अलमतिप्रसङ्गेन। एवं कर्मवाक्यानामपि उपक्रमादिभिः तात्पर्यनिर्णयः। प्रकरणादिना लौकिकवाक्यानां[8] तात्पर्यनिर्णयः एतादृशतात्पर्यानुपपत्तिः पूर्वोक्तलक्षणाबीजं न तु अन्वयानुपपत्तिः। तस्याः 'यष्टीः प्रवेशय' इत्यादौ असम्भवात्, 'गङ्गायां घोषः' इत्यादौ तात्पर्यानुपपत्तेः सम्भवात्। न केवलं लक्षणा पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि। 'गम्भीरायां नद्यां घोषः' इत्यादौ पदसमुदायात्मकवाक्यस्य तीरे लक्षणास्वीकारात्। अत एव अर्थवादवाक्यानां प्राशस्त्ये लक्षणा। अन्यथा पदान्तरवैयर्थ्यं स्यात्। अत एव प्राशस्त्यपदार्थप्रत्यायकत्वेन अर्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वम्। स्वार्थे तात्पर्यवतां 'समिधो यजति' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यानाम् उपकार्योपकारकाकाङ्क्षायाम् एकवाक्यत्वं वाक्यैकवाक्यत्वम्। एवं च अवान्तरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणं तथा अन्वयव्यतिरेकानुविधानात्। एवं यथोक्तसहकारिसम्पन्नवाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमाम् उत्पादयति। तत्र परोक्षार्थप्रतिपादकं वाक्यं परोक्षप्रमोत्पादकम्। यथा 'स्वर्गकामो यजेत' 'सदेव सौम्येदमग्र आसीत्' 'दशमोऽस्ती'ति वाक्यम्। परोक्षत्वं नाम अनावृतसंवित्तादात्म्याभावो योग्यस्य विषयस्य धर्माधर्मयोः अयोग्यत्वात् न प्रत्यक्षत्वम्। अपरोक्षार्थप्रतिपादकं वाक्यम् अपरोक्षप्रमोत्पादकम् यथा 'दशमस्त्वमसि' 'तत्त्वमसि' इत्यादिवाक्यम्। अपरोक्षत्वं नाम अनावृतसंवित्तादात्म्यम्। अनावृतसंवित्साक्षिचैतन्यम्। अन्तःकरणोपहितं चैतन्यं साक्षी। तस्यावृतस्यावृतत्वे[9] सति जगदान्ध्यप्रसङ्गः। तत्तादात्म्यं

---

१. लब्ध्यात् – ख, ग।
२. इति फलश्रवणात् इति पर्यन्तो भागः न दृश्यते – ग।
३. चतुष्ट्य इति पदम् न दृश्यते – क।
४. याज्ञवल्क्यादीनाम् – क।
५. तदसत् इति पदम् न दृश्यते – ख, ग।
६. जिज्ञासा – ग।
७. तीव्रसंवेगमासन्नः – ख।
८. लौकिकानाम् – ख।
९. तस्यावृतत्वे सति – क, ख

नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वम्। तथा च 'दशमस्त्वमसि' इत्यत्र दशमस्य त्वंपदार्थाभिन्नतयाऽपरोक्षत्वेन [१]वाक्यात् दशमापरोक्षप्रमैव जायते दशमोऽस्मीति — [२]ननु वाक्यात्परोक्षज्ञानं मनसा तत्साक्षात्कारः। मनसोऽनिन्द्रियत्वस्योक्तत्वात् वृत्तिं प्रति [३]उपादानत्वेन करणत्वायोगाच्च [४]प्रमाणजन्या अपरोक्षज्ञानस्यैव भ्रमनिवर्तकत्वाच्च। एवं 'तत्त्वमसि' इत्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणः त्वंपदलक्ष्यसाक्ष्यभिन्नतया अनावृतसंवित्तादात्म्यात् नित्यापरोक्षत्वेन शोधितत्वंपदार्थस्य अधिकारिणो मनननिदिध्यासनसंस्कृतान्तःकरणसहकृतविचारिततत्त्वमस्यादिवाक्यात् 'अहं ब्रह्मास्मि' इत्यपरोक्षप्रमा जायते। एवं च सति सर्वे वेदाः यत्पदमामनन्ति तं त्वौपनिषदम् पुरुषं पृच्छामि नावेदविन्मनुते तं [५]बृहन्तम्'' इत्यादिश्रुतयः सामञ्जस्ये न उपपद्यन्ते। 'मनसैवानुद्रष्टव्यम्' इत्यादिश्रुतिस्तु मनसो वाक्यसहकारित्वप्रतिपादनपरा। अन्यथा 'यन्मनसा न मनुते' इत्यादिश्रुतिविरोधप्रसङ्गात्। ।। एवं शाब्दीप्रमा निरूपिता।। अनुपपद्यमानार्थदर्शनात् तदुपपादकभूतार्थान्तरकल्पनम् अर्थापत्तिप्रमा। यथा दिवा अभुञ्जानस्य देवदत्तस्य रात्रिभोजनं विना अनुपपद्यमानपीनत्वाज्ञानात् तदुपपादकं रात्रिभोजनकल्पनम्। तत्रापि अनुपपद्यमानपीनत्वज्ञानं करणं रात्रिभोजनकल्पनं फलम्। सा च अर्थापत्तिः द्विविधा – दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। दृष्टार्थापत्तिर्यथा – ''शुक्तौ इदम् रजतम्'' इत्यनुभूयमानस्य रजतस्य नेदं रजतम् इति बाध्यत्वं दृष्टम्। तस्य मिथ्यात्वमन्तरेण सत्यत्वे अनुपपन्नं सत् मिथ्यात्वं कल्पयति। न चेदं रजतम् इति ज्ञानद्वयम्। पुरोवर्तिनि प्रवृत्त्यभावप्रसंगात्। रजतस्य असत्त्वे [६]तज्ज्ञानस्य प्रत्यक्षत्वाभावप्रसङ्गात्। सत्त्वे बाधाभावप्रसङ्गात्। देशान्तरसत्त्वे रजतेन्द्रियसन्निकर्षाभावेन प्रत्यक्षत्वाभावप्रसङ्गात्। 'रजतं साक्षात्करोमि' इत्यनुभवस्य सर्वानुभवसिद्धत्वात्। तस्माद्भ्रमकाले शुक्तिकाशकले रजतम् उत्पद्यत इत्यङ्गीकर्तव्यम्। रजोत्पादकलौकिकसामग्र्यभावेऽपि पुरोवर्तीन्द्रियसन्निकर्षानन्तरम् इदमाद्याकारवृत्तौ सत्याम् इदम् अविच्छिन्नचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या सादृश्यदर्शनसमुद्बुद्धसंस्कारसहकृता रजताकारेण तज्ज्ञानाकारेण च परिणमते। तस्य च मायाकार्यत्वात् मिथ्यात्वम्। ।। एवं दृष्टार्थापत्तिर्निरूपिता।। श्रुतार्थापत्तिर्यथा 'तरति शोकमात्मवित्' इति शोकोपलक्षितप्रमातृत्वादिबन्धस्य ज्ञाननिवर्त्यत्वं श्रुतं तस्य

---

१. वाक्यादपरोक्षप्रमा – क, ख
२. न तु – क
३. उपादानत्वे – क।
४. प्रमाजन्य – ख।
५. वृद्धम् – ग।
६. तदज्ञानस्य – ग।

मिथ्यात्वमन्तरेण सत्यत्वेऽनुपपन्नं सत् मिथ्यात्वं कल्पयति। सेयं श्रुतार्थापत्तिः। अन्तःकरणविशिष्टचैतन्यं प्रमाता कर्ता भोक्ता च। केवलस्य आत्मनो असङ्गत्वेन प्रमातृत्वाद्यनुपपत्तेः। शुक्तिरजतवत् आत्मज्ञानात् अन्तःकरणादिकं स्वरूपेण प्रत्यगात्मनि अध्यस्तम्। अध्यासो नाम परत्र परावभासः। स च द्विविधः — ज्ञानाध्यासः अर्थाध्यासश्चेति। तत्र अतस्मिन् तद्बुद्धिः ज्ञानाध्यासः। यथा शुक्त्यादौ रजतबुद्धिः यथा वा आत्मनि अनात्मबुद्धिः। प्रमाणजन्यज्ञानविषयः पूर्वदृष्टसजातीयोऽर्थाध्यासः। सोऽपि द्विविधः — प्रातीतिको व्यावहारिकश्चेति। तत्र आगन्तुकदोषजन्यः प्रातीतिकः। यथा शुक्तिरजतादिः। प्रातीतिकभिन्नो व्यावहारिकः। यथा आकाशादिघटान्तं जगत्। तथा च प्रमातृत्वादिबन्धस्य अध्यस्ततया मिथ्यात्वमुपपद्यते। एतदभिप्रायेण उक्तं भगवता भाष्यकारेण "स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इति। अस्यार्थः स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिसदृशः पूर्वदृष्टावभासः – पूर्वदृष्टसजातीयावभास इति [१]ज्ञानाध्यासपक्षे योजना। अर्थाध्यासपक्षे तु प्रमाणजन्यस्मृतिसदृशज्ञानविषयः पूर्वदृष्ट[२]सजातीयावभास इति। एवं श्रुतार्थापत्तिर्निरूपिता। अभावप्रमायोग्यानुपलब्धिकरणिका। यथा — घटानुपलब्ध्या घटाभावप्रमा भूतले जायते। तत्र अनुपलब्धिरेव करणं नेन्द्रियम्। तस्य अधिकरणग्रहेणोपक्षीणत्वात् अभावेन समं सन्निकर्षाभावाच्च। असाधरणं कारणं [३]करणम्। नियतपूर्ववृत्ति कारणम्। तद् द्विविधम् — उपादानकारणं निमित्तकारणञ्चेति। कार्यान्वितं कारणम् उपादानम्। यथा घटादेः मृदादि। कार्यानुकूलव्यापारवत् निमित्तम्। यथा घटादेः कुलालादि। ब्रह्म तु मायोपहितं सत् प्रपञ्चस्य उपाधिप्राधान्येन उपादानं स्वप्राधान्येन निमित्तं भवति। 'तदैक्षत बहु स्यां प्रजायेय' इत्यादिश्रुतेः। 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्राच्च। तच्च कारणं द्विविधम् — साधारणम् असाधारणञ्चेति। कार्यमात्रोत्पादकं साधारणकारणम्। यथा अदृष्टादि। कार्यविशेषोत्पादकम् असाधारण[४]कारणम्। यथा चाक्षुषादिप्रमायां चक्षुरादि। तथा च घटाद्यभावप्रमायां घटाद्यनुपलब्धिः असाधारणकारणम्। तदेव करणम्। यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन 'तर्ह्युपलभ्येत' इति प्रसञ्जितः उपलब्धिरूपः प्रतियोगी यस्याः सा योग्यानुपलब्धिः, तयाऽभावो गृह्यते। [५]नञर्थोल्लिखितधीविषयोऽभावः। स च अत्यन्ताभाव एक एव; भेदे प्रमाणाभावात्। तथा हि 'सदेव सौम्येदमग्र आसीत्' 'सत्त्वाच्चापरस्य' इति श्रुतिसूत्राभ्यां प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्त्वप्रतिपादनेन

---

१. ज्ञानाध्यासपक्षेयोजना – इति पर्यन्तोभागः न दृश्यते – ख, ग।
२. सजातीय इति – क।
३. करणम् इति पदं अदृश्यते – ग।
४. कारणम् इति पदम् अदृश्यते – क, ग।
५. नत्वर्थोल्लिखित – ग।

प्रागभावस्य दुर्निरूप्यत्वात्, प्रागात्मज्ञानात् कार्यस्य निरन्वयनाशानङ्गीकारेण ध्वंसस्यापि [१]दुर्निरूप्यत्वात्। अनादिनित्यत्रैकालिकात्यन्ताभावान्योन्याभावसत्त्ये अद्वैतश्रुतिविरोधापत्तेः। अतो अत्यन्ताभाव एक एव। स च द्विविधः — पारमार्थिको व्यावहारिकश्चेति। 'नेह नानास्ति किञ्चन' इत्यादिश्रुतिप्रतिपादितप्रपञ्चात्यन्ताभावः पारमार्थिकः। स च अधिष्ठानस्वरूपः अधिष्ठानातिरिक्त इति केचित्। घटाद्यत्यन्ताभावो व्यावहारिकः अयमेव [२]भेदप्रतियोगिकः। 'भूतलं घटो न' इत्यादिप्रतीतिविषयो भेद इत्युच्यते। घटो नास्ति इत्यादिप्रतीतिविषयो अत्यन्ताभावः इत्युच्यते वादिभिः। सर्वोऽप्यनित्य एव सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात्। अन्ये तु लौकिकतन्त्रान्तरबुद्धिम् अनुसरन्तोऽभावभेदं स्वीचक्रुः। तथा हि प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदात् चतुर्विधोऽभावः। उत्पत्तेः प्राक् कारणे कार्याभावः प्रागभावः। यथा मृदादौ घटाद्यभावः। उत्पन्नस्य कार्यस्य कारणे अभावो ध्वंसः। यथा मुद्गरादिप्रहरणानन्तरं कपालादौ घटाद्यभावः। प्रतियोग्यसमानाधिकरणाभावो अत्यन्ताभावः। यथा भूतलादौ घटाद्यभावः। प्रतियोगिसमानाधिकरणाभावो अन्योन्याभावः। यथा भूतलादौ [३]घटभेदः। सर्वेऽप्यभावाः अनित्याश्चेति। ।। एवं अभावप्रमा निरूपिता।। एवं [४]षड्विधप्रमायाः सावरणम् अज्ञानं निवर्तते। तत्र परोक्षप्रमया असत्त्वापादकमौढ्याद्यज्ञाननिवृत्तिः। अपरोक्षप्रमया असत्त्वाभानापादकाज्ञाननिवृत्तिः।

।। इति द्वितीयपरिच्छेदः समाप्तः।।

---

१. दुर्निरूपत्वात् – क, ख।
२. अभेदप्रतियोगिकः – ख, ग।
३. घटाभेदः – **ख।**
४. षड्धिया प्रमया – ग।

।। अथ तृतीयः परिच्छेदः।।

प्रमाभिन्नं ज्ञानम् अप्रमा। सा च द्विविधा—स्मृतिः अनुभूतिश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। साऽपि द्विविधा – यथार्थायथार्थभेदात्। यथार्था स्मृतिरपि द्विविधा — [1]अनात्मस्मृतिः, आत्मस्मृतिश्चेति। तत्र 'व्यावहारिकप्रपञ्चो मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तिरूप्यवत्' इत्यनुमानसिद्धं मिथ्यात्वानुमानसन्धानं यथार्थानात्मस्मरणम्, तत्त्वमस्यादिवाक्यार्थानुसन्धानं यथार्थात्मस्मरणम्।

अयथार्था स्मृतिरपि द्विविधा पूर्ववत्। प्रपञ्चस्य सत्यत्वानुसन्धानम् अयथार्थानात्मस्मरणम्। मिथ्यावस्तुत्वात् तस्य अहङ्कारादिषु [2]आत्मत्वानुसन्धानम् आत्मनि कर्तृत्वाद्यनुसन्धानं वा अयथार्थात्मस्मरणम्। [3]स्वप्नस्तु अनुभाव एव न स्मृतिः इति वक्ष्यते।

स्मृतिभिन्नं ज्ञानम् अनुभूतिः। सा द्विविधा — यथार्था अयथार्था चेति। यथार्थानुभूतिः प्रमा। सा निरूपिता। बाधितविषयानुभूतिः अयथार्था। सापि द्विविधा — संशयो निश्चयश्चेति।

एकस्मिन् धर्मिणि भासमानविरुद्धनानाकोटिकज्ञानं संशयः। एकस्मिन् धर्मिणि स्वाकारविरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं संशयः इति केचित्। स च द्विविधः– प्रमाणसंशयः, प्रमेयसंशयश्चेति। तत्र प्रमाणगताऽसंभावना प्रमाणसंशयः। यथा अनभ्यासदशायां भ्रमोत्पन्नं जलज्ञानं प्रमाणं न वेति संशयः। स च प्रामाण्यनिश्चयात् निवर्तते। प्रामाण्यनिश्चयस्तु स्वत एव। प्रामाण्यं नाम तद्वति तत्प्रकारकत्वम्। तस्य स्वतस्त्वं नाम यावत् स्वाश्रयग्राहकग्राह्यत्वम्। स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकसाक्षिचैतन्यं तेन तन्निष्ठप्रामाण्यं गृह्यते इति स्वतःप्रामाण्यम्। अप्रामाण्यं परतो गृह्यते। तच्च

---

१. अन्यात्मस्मृति – ख
२. आत्मानुसन्धानम् – ख
३. स्वप्नवस्तु – ख

तदभाववति तत्प्रकारकत्वम्। तदभाववत्त्वस्य वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुम् अशक्यतया परत एव [१]अप्रामाण्यं गृह्यते। प्रामाण्यस्य स्वतस्त्वपक्षे संशयो दोषवशात् उपपद्यते इत्ययं [२]प्रमाणसंशयः।

वेदान्ताः अद्वितीये ब्रह्मणि प्रमाणं न वा इति संशयः करणगताऽसम्भावना। सा च श्रवणेन निवर्तते। तच्च निरूपितम्। तदपि श्रवणं शारीरके प्रथमाध्यायपठनेन निष्पद्यते। प्रमेयगताऽसम्भावना द्विविधा — अनात्मगता आत्मगता चेति।

स्थाणुर्वा पुरुषो वा इति अनात्मसंशयः। आत्मसंशयोऽनेकविधः। तथा हि – ब्रह्माद्वितीयं सद्वितीयं वा। अद्वितीयत्वेऽपि आनन्दगुणकमानन्दस्वरूपं वा इत्यादि परमात्मगतः संशयः। आत्मा देहाद् व्यतिरिक्तो वा न वा, देहाद् व्यतिरिक्तत्वेऽपि कर्ता वा अकर्ता वा, अकर्तृत्वेऽपि चिद्रूपो वा अचिद्रूपो वा, चिद्रूपत्वेऽपि आनन्दात्मको वा न वा इत्यादि जीवगतः संशयः। जीवस्य सच्चिदानन्दरूपत्वेऽपि परमात्मना सह ऐक्यं सम्भवति न वा, ऐक्येऽपि तज्ज्ञानं मोक्षसाधनं न वा, मोक्षसाधनत्वेऽपि तज्ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा, केवलं ज्ञानं वा इति ऐक्यगतः संशयः।

अयं सर्वोऽपि संशयो मननेन तर्कात्मकेन निवर्तते। तर्को नाम अनिष्टप्रसङ्गः। व्याप्यारोपेण व्यापकापादनम् इति यावत्। व्याप्त्याश्रयो व्याप्यम्। व्याप्तिनिरूपकं व्यापकम्। तथा च यदि प्रपञ्चः सत्यः स्यात् तर्हि अद्वितीयश्रुतिविरोधः स्यात्। यदि परमात्मा जीवभिन्नः स्यात् तर्हि घटादिवत् अनात्मत्वेन अनित्य एव स्यात्।

यदि आत्मा आनन्दो न स्यात् तर्हि कोऽपि न व्याप्रियेत इत्यादि व्याप्यारोपेण व्यापकप्रसञ्जनरूपास्तर्काः श्रुत्युक्ता द्रष्टव्याः।

एतच्च [३]मननं निरूपितम्। एतन्मननं शारीरके द्वितीयाध्यायपठनेन निष्पद्यते।

[४]संशयविरोधिज्ञानं निश्चयः। स च द्विविधः — यथार्थोऽयथार्थश्चेति। अविसंवादी यथार्थनिश्चयः। स च उक्त एव। विसंवादी अयथार्थनिश्चयः।

स च द्विविधः – तर्को विपर्ययश्चेति। तर्कस्तु उक्त एव। विपर्ययो मिथ्याज्ञानम्। अतस्मिंस्तद्बुद्धिरिति यावत्। स च द्विविधः — निरुपाधिकः सोपाधिकश्चेति। तत्र

---

१. अप्रामाण्यं स्वतः गृह्यते संशयो – क
२. प्रम – ख
३. मननं – इति पदम् न दृश्यते – ख
४. संशयज्ञानविरोधि – क

आद्यो द्विविधः — बाह्य आभ्यन्तरश्चेति। शुक्त्यादौ इदं रजतम् इत्यादि बाह्यः। 'अहम् अज्ञः ब्रह्म न जानामि' इत्याभ्यन्तरः।

सोपाधिको द्विविधः — बाह्य आभ्यन्तरश्चेति। लोहितस्फटिक इत्यादि बाह्यः। आकाशादिप्रपञ्चभ्रमोऽपि बाह्यः। सोपाधिकः कर्माविद्याकार्यत्वात् तत्त्वज्ञानिनो निवृत्तेऽपि अज्ञाने प्रारब्धक्षयपर्यन्तं प्रपञ्चोपलब्धिदर्शनात् कर्तृत्वादि[1]भ्रम आभ्यन्तरः। स्वप्नोऽपि आभ्यन्तरः सोपाधिकभ्रम एव न तु स्मृतिः। तथा हि जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके सकलविषयेन्द्रियादिवासनावासितं निद्रादोषोपप्लुतमन्तः- करणं रथादिविषयाद्याकारेण ग्राहकेन्द्रियाकारेण रथादिविषयाकारवृत्त्याकारेण च परिणमते।

अन्तःकरणोपहित[2]साक्षी स्वयम् अन्यानवभास्यस्तत्सर्वमवभासयति। अत एव स्वप्ने साक्षिणः स्वप्रकाशत्वं सुविज्ञेयम्। जाग्रदवस्थायां सूर्यादितेजोभिः सङ्कीर्णत्वात् साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयम्। स्वप्ने तु सूर्यादीनां जाग्रत्पदार्थानाम् उपरतत्वात् स्वप्रकाशत्वं विवेक्तुं शक्यते। तथा च श्रुतिः "स यत्र स्वपित्यस्य लोकस्य सर्वतो मात्रामुपादाय स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादिः।

स्वयंज्योतिः स्वयंप्रकाशः चैतन्यविषय इति यावत्। एवं स्वप्नोऽनुभवरूप एव न स्मृतिः; अन्यथा रथं पश्यामि इत्यनुभवविरोधप्रसङ्गात्। स्वप्ने पदार्थानाम् अन्तः- करणमायाद्वारा शुद्धचैतन्याध्यस्तत्वेन इदानीं तत्साक्षात्काराभावेन बाधाभावेऽपि सोपाधिकतया उपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः। कर्मनिद्रोपप्लुतमन्त- करणमुपाधिः। केचित्तु स्वप्नाध्यासं निरुपाधिकं वदन्ति। तत्र विरोधिजाग्रत्प्रत्ययेन तन्निवृत्तिः। पुनश्च विपर्ययः प्रकारान्तरेण द्विविधः — अन्तःकरणवृत्तिरूपो अविद्यावृत्तिरूपश्चेति। स्वप्नादिः अन्तःकरणवृत्तिरूपः। रजतादि भ्रमोऽविद्यावृत्ति- रूपश्चेति।

संशयस्त्वविद्यावृत्तिरेव। तत्र एवं सति निरुपाधिकविपर्ययो [3]निदिध्यासनेन निवर्तते। सोपाधिकस्तु उपाधिनिवृत्त्या। निदिध्यासनं निरूपितमेव। तदपि शारीरके तृतीयाध्यायपठनेन

---

१. भ्रमोभ्यन्तर – ख
२. साक्षी च – क
३. निदिध्यासनेन न निवर्तते – ख

निष्पद्यते। एवञ्च श्रवणमनननिदिध्यासनैः असम्भावनाविपरीतभावनानिवृत्तौ असत्यन्यस्मिन् प्रतिबन्धे तत्त्वमस्यादिवाक्यात् 'अहं ब्रह्मास्मि' इत्यपरोक्षप्रमा जायते। तदुक्तम् "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति।

प्रतिबन्धस्त्रिविधः — भूतभाविवर्तमानभेदात्। भूतप्रतिबन्धः पूर्वानुभूतविषयस्यावेशेन पुनः पुनः स्मरणम्। तदुपाधिकब्रह्माऽनुसन्धानेन तन्निवृत्तिः। यथा भिक्षोः पूर्वानुभूतमहिष्यादिस्मरणेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्मानुसन्धानेन तन्निवृत्तिरिति वदन्ति। भाविप्रतिबन्धो द्विविधः — प्रारब्धशेषो ब्रह्मलोकेच्छा चेति। तत्र प्रारब्धकर्म द्विविधम् – फलाभिसन्धिकृतं केवलं चेति। फलाभिसन्धिकृतं फलं दत्त्वैव नश्यति। तस्मिन् सति ज्ञानं नोत्पद्यते तस्य प्रबलत्वात्। तथा च श्रुतिः "स यथाकामो भवति तथा क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते" इति। तादृशप्रारब्धशेषः भाविप्रतिबन्धः केवलं प्रारब्धं तत्त्वज्ञानहेतुः पापनिवृत्तिद्वारा। तथा च श्रुतिस्मृती "धर्मेण पापमपनुदति" "ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः" इति। "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" इति। एवं च भाविप्रतिबन्धस्य प्रारब्धशेषस्य भोगेन निवृत्तौ सत्यपि श्रवणादौ न ज्ञानोदयः। तथाहुः

वामदेवस्य एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः" इति

ब्रह्मलोकेच्छया ब्रह्मसाक्षात्कारोत्पत्तिप्रतिबन्धकत्वं विद्यारण्यस्वामिनो वदन्ति स्मः –

ब्रह्मलोकाभिवाञ्छायां सम्यक् सत्यां निरुध्यताम्।
विचारयेत् यस्त्वात्मानं न तु साक्षात्करोत्ययम्।। इति

स पुनः वेदान्तश्रवणादिमहिम्ना ब्रह्मलोकं गत्वा निर्गुणं ब्रह्म साक्षात्करोति। तथा च श्रुतिः

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे।। इति

स पुनः तत्रैव मुच्यते। वर्तमानप्रतिबन्धं तन्निवृत्त्युपायं च विद्यारण्यस्वामिनो वर्णयांचक्रुः।

प्रतिबन्धो वर्तमानो विषयासक्तिलक्षणः।
प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहौ।। इति

शमाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयम्।
नीतेऽस्मिन् प्रतिबन्धे तु स्वस्य ब्रह्मत्वमश्नुते।। इति।

ततश्च श्रवणादिभिः सकलप्रतिबन्धकनिवृत्त्या वाक्याद् ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धासमाधानानि अन्तरङ्गसाधनानि। अन्तरिन्द्रियनिग्रहः शमः। बाह्येन्द्रियनिग्रहो दमः। उपरतिः संन्यासः। तितिक्षा द्वन्द्वसहिष्णुता। श्रद्धा गुरुवेदान्तवाक्येषु विश्वासः। समाधानं श्रवणादिषु चित्तैकाग्र्यम्। "शान्तो दान्त उपरतः तितिक्षुः समाहितो भूत्वा आत्मन्येव आत्मानं पश्येत्" इति श्रुतेः। सूत्रकारोऽप्याह — "शमदमाद्युपेतः स्यात्तथापि तद्विधेस्तदङ्गतया तेषाम्। अवश्यानुष्ठेयत्वादि"ति। यज्ञादयो बहिरङ्गसाधनानि। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनशनकेन" इत्यादिश्रुतेः। "सर्वापेक्षा च यज्ञादिति श्रुतेरश्ववत्" इत्यप्युक्तम्। तदेवं मननादिसंस्कृतचित्तदर्पणसहकृत-विचारितमहावाक्योत्पन्नेन 'अहं ब्रह्मास्मि' इति अप्रतिबद्धब्रह्मसाक्षात्कारेण अज्ञाननिवृत्तेः सञ्चितकर्मणां नष्टत्वात् आगामिकर्मणाम् अश्लेषात् प्रारब्धापादितविषयमनुभवन् मुमुक्षुः अखण्डैकरससच्चिदानन्दब्रह्मात्मना अवतिष्ठते। एतादृशं फलं चतुर्थाध्यायपठनेन भवतीति सांप्रदायिकानां रीतिः। अन्ये तु गुरुमुखात् सम्पूर्णशास्त्रपठनं श्रवणं, तस्य पठितस्य युक्तिभिरनुसन्धानं मननम्, तस्यैव पुनःपुनरावृत्तिः निदिध्यासनम्, अनन्तरं साक्षात्कारः इत्याहुः। वस्तुतस्तु शुद्धसत्त्वानां मुख्याधिकारिणां व्युत्पन्नानाम् अव्युत्पन्नानां च श्लोकेन अर्धेन वा ब्रह्मसाक्षात्कारो भवत्येव। शब्दस्य अचिन्त्यशक्तत्वात्। शास्त्रस्य शारीरकादेः मुख्याधिकारिविषयोपपत्तेः। तदुक्तं महाभारते —

आत्मानं विन्दते यस्तु सर्वभूतगुहाशयम्।
श्लोकेन यदि वाऽर्धेन क्षीणं तस्य प्रयोजनम्।। इति

साम्प्रदायिकैरप्युक्तम् –

वाक्यश्रवणमात्रेण पिशाचवत् अवाप्नुयात् इति।

एतावानत्र विशेषः। अव्युत्पन्नानां परतन्त्रप्रज्ञत्वात् असम्भावनादिसम्भवात् ध्याननिष्ठा अपेक्षिता। तदुक्तं भगवता —

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।। इति

विद्यारण्यैरप्युक्तम् —

अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाऽप्यसम्भवात्।
यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम्।। इति

"मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यते" इति च। पतञ्जलिनाप्युक्तम्–"ततः प्रत्यक्चेतनाधिगमोऽन्तरायाभावश्चेति।" "प्रमाणकुशलानां संशयादिग्रस्तानां पण्डितानामपि ध्याननिष्ठा अपेक्षिता।"

तदुक्तम् – "[१]अपि संराधने प्रत्यक्षानुमानाभ्याम्।" इति।

अन्यत्राप्युक्तम् –

बहुव्याकुलचित्तानां विचारात् तत्त्वधीर्न चेत्।
[२]योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति।। इति

संशयादिरहितानां ध्याननिष्ठा चेत् स्यात् दृष्टं सुखम्। तदुक्तं भगवता —

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च।। इति

न तु ज्ञानिनो [३]ध्यानविधिः।

देहाभिमानशून्यतया कर्तृत्वाभावेन तस्य विधिकिङ्करत्वायोगात्। तदुक्तम् – "[४]अनुज्ञापरिहारौ देहसम्बन्धात् ज्योतिरादिवत्" इति

भाष्यकारैरप्युक्तम् – "अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति देहेन्द्रियादिषु अहं ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणवृत्त्यनुपपत्तेः" इति।

---

१. अभिसंराधने – ख
२. योगो मुख्यम् – क
३. ध्यानादि विधीयते – ख
४. अनुज्ञापरिहारादौ – क

गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।
सद्ब्रह्मात्माहमस्मीति बोधे कार्यं कथं भवेत्।। [1]इत्युक्तम्।

ज्ञानिनो ध्यानाभावे [2]व्यवहारप्राचुर्यात् दृष्टदुःखमात्रं न मोक्षप्रतिबन्धः। तदुक्तम् — "तन्निष्ठस्य मोक्षोपदेशात्" इति। तस्मिन् [3]ब्रह्मात्मनि निष्ठा अनन्य [4]व्यावहारतया परिसमाप्तिः पर्यवसानं यस्य सः तथा तस्य, ज्ञानैकशरणस्येति यावत्।

तथा च भगवानप्याह —

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते।।
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वाऽपि स इमाँल्लोकान् न हन्ति न निबध्यते।।

शेषोऽपि —

[5]हयमेध शतसहस्राण्यथ कुरुते ब्रह्मघातलक्षणि।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः।। इति

विद्यारण्यैरप्युक्तम् –

पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा।
मोक्षो विनिश्चितः किन्तु दृष्टदुःखं न नश्यति।। इति

बोधस्य पूर्णत्वावधिः विष्णुपुराणे पराशरेण दर्शितः —

अहं हरिः सर्वमिदं जनार्दनो
नान्यत्ततः कारणकार्यजातम्।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगता भवन्ति।। इति

---

१. इत्युक्त्या – ख
२. व्यवहार – इति पदं न दृश्यते – ख
३. ब्रह्मणि निष्ठा – ख
४. व्यापारतया – ख
५. हयमेध प्रातः सहस्राण्यथ – ख

ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनापि —

अहं हि सर्वं न च किं चिदन्य-
न्निरूपणायामनिरूपणायाम्।
इयं हि वेदस्य परा हि निष्ठा
ममानुभूतिश्च न संशयश्च।। इति

उपदेशसहस्रिकायामपि –

देहात्मज्ञानवद् ज्ञानं देहात्मज्ञानबाधकम्।
आत्मन्येव भवेद्यस्य सोऽनिच्छन्नपि मुच्यते।। इति

"अयमस्मीति पूरुष" इत्यत्र अयम् इति श्रुतेः तात्पर्यप्रतिपादनव्याजेन विद्यारण्यैरपि दर्शितं [1]तृप्तिदीपे –

असन्दिग्धाविपर्यस्तबोधो देहात्मताक्षये।
तद्वदात्मनि निर्णेतुमयमित्युच्यते पुनः।। इति

सर्वथापि श्रवणादिना ब्रह्मसाक्षात्कारः ततो ब्रह्मभावलक्षणा मुक्तिः भवतीति सिद्धम्। "तमेव विदित्वाऽतिमृत्युमेति" "[2]नान्यः पन्था विद्यतेऽयनाय" "तरति शोकमात्मवित्" "ब्रह्मविद् ब्रह्मैव भवति" "एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः।"

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्। इति

"यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति" इति। "एतत्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत" इत्यादि श्रुतिस्मृतिभ्यः। शेषोऽप्याह–

[3]वृक्षाग्राच्च्युतपादो यद्वदनिच्छन्नपि क्षितौ पतति।
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवलीभवति।। इति

।। इति तृतीयपरिच्छेदः समाप्तः।।

---

१. स्मृतिदीपे – क
२. अयं मन्त्रः न दृश्यते – ख
३. वृक्षाग्रच्युत – क

।।अथ चतुर्थः परिच्छेदः।।

सा च मुक्तिर्द्विविधा—विदेहमुक्तिः जीवन्मुक्तिश्चेति। तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपात[1]तो विदेहमुक्तिः [2]तदुक्तम् – भोगेन त्वितरे [3]क्षपयित्वा संपद्यते। इति।''

अन्ये तु भाविशरीरानारम्भो विदेहमुक्तिः। सा च ज्ञानोत्पत्तिसमकाला। ज्ञानेनाज्ञाननिवृत्तेः सञ्चितकर्मणां नाशात् आगामिकर्मणामश्लेषात् भोगेन प्रारब्धक्षयात् शरीरान्तरा[4]रम्भकस्य असंभवात्। भाविशरीरानारम्भकस्य[5] ज्ञानसमकालत्वं [6]युज्यते इति। तदुक्तम् —

तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः।।

इत्येवं वर्णयाञ्चक्रुः।

श्रवणादिभिरु[7]त्पन्नब्रह्मसाक्षात्कारस्य विद्वत्संन्यासिनः [8]कर्तृत्वाद्यखिलबन्ध-प्रतिभासनिवृत्तिर्जीवन्मुक्तिः। भोगापादकप्रारब्धप्राबल्येऽपि योगाभ्यासेन तदभिभवसंभवात् प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात्। अन्यथा पुरुषप्रयत्नवैयर्थेन चिकित्साशास्त्रमारभ्य

---

१. पाते – ख, ग
२. तदुक्तम् – इत्यारभ्य विदेहमुक्तिरितिपर्यन्तं ख व्रतो नास्ति।
३. क्षययित्वा – क
४. रारम्भस्य – ख
५. नारभस्य – ख, ग
६. युज्यते तदुक्तम् – क, ख
७. रूत्पन्नसाक्षात्कारस्य – क, घ
८. कर्तव्याद्यखिल – ख

[१]वेदान्तशास्त्रपर्यन्तस्यानारम्भप्रसङ्गात्। अतएव पुरुषप्रयत्नस्य साफल्यमाह वसिष्ठः—

आबाल्यादलमभ्यस्तैः शास्त्रसत्सङ्गमादिभिः।
गुणैः पुरुषयत्नेन सोऽर्थः संप्राप्यते हितः।। इति

तत्र श्रुतिस्मृतीतिहासपुराणवचनानि प्रमाणानि। "विमुक्तश्च विमुच्यते" इति श्रुतिः।

यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते।।

इति वसिष्ठे।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।
सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।। इति

अत्र [२]जीवन्मुक्त एव भक्त इत्युच्यते। प्रकाशञ्च [३]प्रवृत्तिञ्चेत्यारभ्य गुणातीतः स उच्यते। इत्यन्तेन जीवन्मुक्तो दर्शितः।

निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः।।

इति महाभारते।

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः।
एवं जाग्रत्प्रपञ्चोऽयं मयि माया विजृम्भितः।। इति

यो वेद वेदवेदान्तैः सोऽतिवर्णाश्रमी भवेदिति पुराणे। सेयं जीवन्मुक्तिः

---

१. वेदान्तशास्त्रस्यानारभ्य प्रसङ्गात् – ग; मोक्षशास्त्रः – ख
२. जीवन्मुक्त उच्यते – क, ग
३. प्रवृत्तिञ्च मोहमेव च पाण्डवे इत्यारभ्य – क

तत्त्वज्ञानवासनाक्षयमनोनाशाभ्यासात्[1] [2]सिद्ध्यति। उत्पन्नस्य तत्त्वज्ञानस्य अभ्यासो नाम पुनः पुनः केनाप्युपायेन तत्त्वानुसन्धानम्। तदुक्तम् —

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्।
एतदेकपरत्वञ्च [3]ज्ञानाभ्यासं विदुर्बुधाः।। इति

यद्यपि तस्य तत्त्वज्ञानात् प्रागपि वासनाक्षयमनोनाशाभ्यासोऽपेक्षितः तथापि [4]विविदिषासंन्यासेन [5]स उपसर्जनभूतः श्रवणाद्यभ्यास एव प्रधानः। विद्वत्संन्यासिनस्तु तत्त्वज्ञानाभ्यास उपसर्जनभूतो वासनाक्षयमनोनाशाभ्यासः प्रधानः इत्यविरोधः। [6]कृतोपास्तिकस्य मुख्याधिकारिणः तदपेक्षाभावेऽप्यकृतोपास्तेः अस्मदादेः तदभावे चित्तविश्रान्त्यभावात् उत्पन्नमपि तत्त्वज्ञानं विषयाबाधात् प्रमारूपमज्ञाननिवर्त्तकमपि असंभावनादि[7]सम्भवान्न तत्सुखकरमिति वासनाक्षयमनोनाशभ्यासोऽपेक्षितः। वासनासामान्यलक्षणं तद्विभागं तत्प्रयोजनं तल्लक्षणं च वसिष्ठ आह —

दृढभावनया [8]त्यक्तापूर्वापरविचारणम्।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता।।
वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा।
मलिना जन्महेतुः स्यात् शुद्धा [9]जन्मविनाशिनी।।
अज्ञानसाधनाकारा मनाहङ्कारशालिनी।
[10]पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः।।
पुनर्जन्माङ्कुरं त्यक्त्वा स्थिता संभ्रष्टबीजवत्।

---

१. नाशाभ्यासात् तत्सिध्यति – क
२. सिध्यति इत्यनन्तरं उत्पन्नस्य इत्यारभ्य विदुर्बुधाः इति इति पर्यन्तो भागः 'ग' व्रतौ नास्ति।
३. ब्रह्माभ्यासं – ख
४. उपसर्जनभूतः – क
५. कृतपोपासनस्य – क, ग
६. विविदिषा संन्यासिन – क, ख, ग
७. सम्भवान्न सुखकरं – ख
८. त्यक्त्वापूर्वा – क
९. जन्मविनाशिनी – ग
१०. पुनर्जन्मान्तरं त्यक्त्वा स्थिता संमृष्टबीजवत् – ग

देहार्थं ध्रियते ज्ञातृज्ञेया शुद्धेति चोच्यते।। इति।

तत्र मलिनवासनाजन्महेतव: अनेकप्रकारा दर्शिता: —

लोकवासनया जन्तोर्देहवासनयाऽपि च।
शास्त्रवासनया ज्ञानं यथावन्नैव जायते।। इति

दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।। इति च।

योषित्पुत्रादिविषयाभिलाषाश्च मलिनवासना द्रष्टव्या:। विवेकदोषदर्शनसत्सङ्ग-सन्निधित्यागप्रतिकूलवासनोत्पादनेन उक्तानां मलिनवासनानामन्त:करणगतानाम् [१]अनुत्पादो वासनाक्षयाभ्यास:। तथैव वसिष्ठादिभिर्दर्शितम् —

दृश्यासंभवबोधेन रागद्वेषादितानवे।
[२]रतिर्धनोदिता या तु बोधाभ्यासं विदु: परम्।। इति

असङ्गव्यवहारित्वाद् [३]भवभावनवर्जनात्।
शरीरनाशदर्शित्वाद् वासना न प्रवर्तते।। इति च।

[४]नैष्कर्म्येण न तस्यार्थो न तस्यार्थोऽस्ति कर्मभि:।
न समाधानजप्याभ्यां यस्य निर्वासनं मन:।।
आत्मासङ्गस्ततोऽन्यत् स्यादिन्द्रजालमिदं जगत्।
इत्यचञ्चलनिर्णीते कुतो मनसि वासना।। इति

दु:खं जन्मजरादु:खं मृत्युदु:खं पुन: पुन:।
संसारमण्डलं दु:खं पच्यन्ते यत्र जन्तव:।। इतीतिहासे।

नि:संगता मुक्तिपदं यतीनां सङ्गादशेषा: प्रभवन्ति दोषा:।
आरूढयोगोऽपि निपात्यतेऽध: सङ्गेन योगी किमुताल्पसिद्धि:।।

---

१. मुत्सादो – ख
२. रतिर्नैवोदिता – ख, ग
३. भावाभाव विवर्जनात् – ख
४. नैष्कर्म्येण इत्यारभ्य मनसिवासना इत्यन्तो भाग: 'ख' प्रतौ नास्ति।

इति विष्णुपुराणे। तथा भागवतेऽपि –

सङ्गं त्यजेत [१]मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिन्द्रियाणाम्।
एकश्चरेद्रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत् प्रसङ्गः।। इति

स्त्रीणां तत्सङ्गिनां सङ्गं [२]त्यक्त्वा दूरत आत्मवान्।
[३]क्षमो विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः।। इति च।

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां [५]सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये।।

इति च।

[६]तत्सङ्गे पातित्य[७]माह —

योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः।। इति

प्रतिकूलवासना मैत्र्यादिवासनाः। ताश्च दर्शिताः — "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातः चित्तप्रसादम्" इति। अस्यार्थः [८]सुखिप्राणिष्वेते मदीया इति मैत्री [९]दुःखिप्राणिषु यथा मम दुःखं मा भूत् [१०]एवमन्येषामपि दुःखं मा भूदिति करुणां [११]पुण्यकारिषु पुरुषेषु मुदितां [१२]पापिषु उपेक्षाञ्च भावयतो [१३]भावनां

---

१. मिथुनवर्त्तिनां – ख
२. त्यक्त्वातिदूरत आत्मवित् – क
३. समेविवक्त – ख, क्षेमे – ग
४. चिन्तयन्मान – क
५. सङ्ग सङ्गं – ख
६. तत्सङ्गेन – क योषित्सङ्गे – ख
७. माहुः – ख
८. सुखिषु प्राणिषु – क, ग
९. दुःखिषु प्राणिषु – क
१०. तदेवमन्येषाम् – क
११. पुण्यकारि पुरुषेसु – क
१२. पापिषु – ख
१३. भावना कुर्वतः – ख; भवियतः रागः – ग

कुर्वतः रागद्वेषासूयामदमात्सर्यादिनिवृत्त्या चित्तप्रसादो भवतीति।[१] तथा दैवीसंपदभ्यासेन आसुरीसंपन्नश्यति। दैवीसंपद् भगवता दर्शिता – "अभयं सत्त्वसंशुद्धिः "इत्यारभ्य" दैवीमभिजातस्य [२]भारत" इत्यन्तेन। अमानित्वमित्यादिनोक्ता अमानित्वादिधर्माभ्यासेन तद्विवरीतमानायो नश्यन्ति।[३] तथा च [४]मैत्र्यादिवासनां सङ्कल्पपूर्वकमभ्यस्य अनन्तरम् अजिहमत्वादि धर्मानभ्यसेत्। अजिह्मत्वादयो दर्शिताः –

[५]अजिह्मः षण्ढकः पङ्गुरन्धो बधिर एव च।
मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः।। इति

इदमिष्टमिदं नेति [६]योऽश्नन्नपि न सज्जते।
हितं सत्यं मितं वक्ति तमजिह्मं प्रचक्षते।।
अद्यजातां यथा नारीं तथा षोडशवार्षिकीम्।
शतवर्षाञ्च यो दृष्ट्वा निर्विकारः स षण्ढकः।।
भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च।
[७]योजनान्न वरं याति सर्वथा पङ्गुरेव सः।।
तिष्ठतो व्रजतो वाऽपि यस्य चक्षुर्न दूरगम्।
चतुर्युगां भुवं [८]मुक्त्वा परिव्राट् सोऽन्ध उच्यते।।
हिताहितं मनोरमं वचः शोकावहं च यत्।
[९]श्रुत्वाऽपि यो न शृणुते बधिरः स प्रकीर्तितः।।
सान्निध्ये विषयाणाञ्च समर्थोऽविकलेन्द्रियः।
सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते।। इति

तदनन्तरं चिन्मात्रवासनामभ्यसेत्। नामरूपात्मकस्य जगतः चैतन्ये कल्पितत्वेन [१]सतः

---

१. यथा दैवीसम्पदोदर्शिताभ्यासेनासुर सम्पत् – ख
२. 'भारत' इति नास्ति – क, ख
३. तथा च पदम् नास्ति – क
४. मैत्र्यादि वासनानां – ग
५. अजिह्वः इति, पदं सर्वत्र 'अजिह्म' स्थाने वर्तते – क, ग
६. योऽश्नन्नपि इति शुद्धपाठः अस्माभिः स्वीकृतः।
७. योजनात्रावरं – क
८. त्यक्त्वा – ख
९. श्रुत्वापि यो न श्रुणुते इति पाठः अस्माभिः शुद्धि कृतः।

सत्ताशून्यतया चैतन्य[२]सत्तास्फुरणपूर्वकमेव भवति। [३]तत्र नामरूपे मिथ्यात्व-निश्चयेनोपेक्ष्य चिन्मात्रोऽहमिति भावयेत्। सेयं चिन्मात्रवासना द्विप्रकारा कर्तृकर्मकरणानुसंधान- पूर्विका केवला चेति। तत्र सर्वं जगच्चिन्मात्रमहं मनसा भावयामीति क्रियमाणा प्रथमा। सा संप्रज्ञातसमाधिकोटावन्तर्भवति।

कर्तृकर्मकरणानुसन्धानरहिता चिन्मात्रोऽहमिति भावना केवला। सर्वस्य चिन्मात्रत्वं शुक्रेण बलिं प्रत्युपदिष्टम् –

[४]चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत्।
चित्त्वं चिदहमेवेति लोकाश्चिदिति सङ्ग्रहः।। [५]इति

द्वितीयाऽसंप्रज्ञातसमाधिकोटावन्तर्भवति। तस्यां चिन्मात्रवासनायां [६]दृढतया अभ्यास्तायां पूर्वोक्तमलिनवासनाः सर्वाः क्षीयन्ते। अयं वासनाक्षयाभ्यासः जतुसुवर्णादिवत् सावयवं कामादिवृत्तिरूपेण [६]परिणममानमन्तःकरणं मननात्मकत्वान्मनः। तच्च सत्त्वरजस्तमोगुणात्मकं तदाश्रयत्वेन सत्त्वरजस्तमोविकाराणां सुखदुःखमोहादीनाम् उपलम्भात् रजस्तमोवृत्तिभिः उपचीयमानमन्तःकरणं पीनमात्मदर्शनायोग्यं [८]भवतीत्यतस्तदर्थं वृत्तिनिरोधेन सूक्ष्मतापादनं मनोनाश इत्युच्यते। तत्साधनानि [९]दर्शितानि—

अध्यात्मविद्याधिगमः साधुसङ्गम एव च।
वासना संपरित्यागः प्राणस्पन्दनिरोधनम्।।
एतास्तु युक्तयः पुष्टाः सन्ति [१०]चित्तजये किल।। इति

प्राण[११]निरोधोपायो दर्शितः –

---

१. स्वतः – क, ख
२. सत्ता स्फुरणमेव – क
३. तं नामरूप मिथ्यात्व निश्चयेन – ग
४. चिदिहास्तीति – ख
५. इति इति पदम् 'ख' प्रतौ नास्ति।
६. दृढाभ्यस्तायां – क, ग
७. परिणम्यमान – क
८. भवति अतस्तदर्थं – क, ख
९. दर्शितानि पदं 'क' प्रतौ नास्ति।
१०. चित्तलये – ख
११. निरोधोवायोपि – ख

प्राणायामदृढाभ्यासात् युक्त्या च गुरूदत्तया।
आसनाशनयोगेन प्राणस्पन्दो निरूध्यते।। इति

प्राणायामप्रकारो दर्शितः —

इडया पिब षोडशभिः पवनं चतुरुत्तरषष्टिकमौदरिकम्।
त्यज पिङ्गलया शनकैः शनकैर्दशभिर्दशभिर्द्वयधिकैः।। इति

इडया वामनासिकया पिब पूरय, त्यज रेचय पिङ्गलया दक्षिणनासिकया इत्यक्षरार्थः। प्राणायामस्य मनोनाशोपायत्वं श्रुतावप्युक्तम् –

प्राणान् [१]प्रपिड्येह सुयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत।
[२]दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः।। इति

आसनयोगं [३]तत्साधनं तत्फलं पतञ्जलिः असूत्रयत् तत्र – "स्थिरसुखमासनं प्रयत्नशैथिल्यानन्तसमापत्तिभ्यां ततो द्वन्द्वानभिधातः"[४] इति। प्रयत्नशैथिल्यं लौकिकवैदिककर्मत्यागः। फणासहस्रेण धरणीं धृत्वा योऽनन्तो वर्तते स एव अहमस्मीत्यनुसंधानम् अनन्तसमापत्तिः। अनया आसनप्रतिबन्धकदुरितं क्षीयते।[५] "ततो द्वन्द्वानभिघातः।" आसनाभ्यासस्य फलं द्वन्द्वनिवृत्तिः। आसनयोगोऽपि दर्शितः —

द्वौ भागौ पूरयेदन्नं जलेनैकं प्रपूरयेत्।
मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्।। इति

एवं प्राणायामादिना प्राणस्पन्दे निरुद्धे अखिलाश्चित्तवृत्तयो निरुद्ध्यन्ते प्राणस्पन्दाधीनत्वाच्चित्तवृत्त्युदयस्य। ततश्च स्वाभावतश्चात्माकारमन्तःकरणम् अनात्माकारवृत्तिनिरोधादात्मैकाकारं भवति। यथाहुः —

आत्माऽनात्माकारं स्वभावतोऽवस्थितं [६]सदा चित्तम्।
आत्मैकाकारतया [७]तिरस्कृतानात्मदृष्टि विदधीत।। इति

---

१. प्रतिषेत् – ख
२. उच्छ्वासयुक्तमिव – ख
३. आसनाशनयोग – क; आसनाशनयोः तत्साधन – ग
४. 'इति' इति वदं, क, ग प्रतौ नास्ति।
५. ततो द्वन्द्वानभिघात् वदं 'ख' प्रतौ नास्ति।
६. सदा इति पदं 'ख' प्रतौ नास्ति।
७. तिरस्कृत्य – क

अयमेव योगः यथाहुः — "योगश्चित्तवृत्तिनिरोधः" इति।[१] तस्मात् तत्साधनं चाहुः — "अभ्यासवैराग्याभ्यां तन्निरोधः" इति। भगवानपि[२] तत्रैव —

असंशयं महाबाहो मनोदुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। इति

वैराग्यं निरूपितम्।[३] चित्तवृत्तिनिरोधो द्विविधः — सम्प्रज्ञातो असम्प्रज्ञातश्चेति। तत्र [४]कर्त्राद्यनुसन्धानं विना लक्षैक गोचरं [५]प्रत्ययप्रवाहः संप्रज्ञातसमाधिः। यथाहुः –

विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्।
परिशिष्टन्तु चिन्मात्रं सदानन्दं विचिन्तयेत्।।
ब्रह्माकारमनोवृत्तिप्रवाहोऽहं कृतिं विना।
सम्प्रज्ञातसमाधिः स्याद् ध्यानाभ्यासप्रकर्षजः।। इति

अस्य सम्प्रज्ञातसमाधेः अङ्गिनः यमाद्यष्टाङ्गानि। तत्र यमनियमासनप्राणायाम- प्रत्याहाराः बहिरङ्गानि। अहिंसासत्यस्तेयब्रह्मचर्यापरिग्रहाः यमाः। अष्टाङ्गमैथुनवर्जनं ब्रह्मचर्य। यथाहुः–

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च।।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः।।
सत्सङ्गसन्निधित्यागदोषदर्शनतो भवेत्।। इति

अत एव [६]स्त्रीसम्भाषणादि[७] निषेधोऽपि मुमुक्षूणाम् —

न सम्भाषयेत् स्त्रियं काञ्चित् पूर्वदृष्टां च न स्मरेत्।
कथाञ्च वर्जयेत्तासां न पश्येल्लिखितामपि।।

---

१. 'तस्मात्' पदं 'ख' 'ग' प्रतौ नास्ति।
२. कर्माद्यनुसन्धान - (ख) 'तत्रैव' इति पदं 'ख' नास्ति।
३. निरोधो – क, ग
४. कर्माद्यनुसन्धान – ख
५. प्रत्यक् – ख
६. स्त्रीसंभाषण – ख
७. निरोधोऽपि – क

इत्यादि स्मृतौ। शौचसन्तोषतपःस्वाध्यायेईश्वरप्रणिधानानि नियमाः। आसनं निरूपितम् — तच्च पद्मस्वस्तिकाद्यनेकप्रकारम्। रेचकपूरककुम्भकाः प्राणायामाः। इन्द्रियाणां विषयेभ्यो निवर्तनं प्रत्याहारः। एतेषु बहिरङ्गेषु जितेषु अन्तरङ्गेषु यत्नः कर्तव्यः।

धारणाध्यानसमाधयः सम्प्रज्ञातसमाधेः अन्तरङ्गसाधनानि। धारणा नाम मूलाधार-मणिपूरकस्वाधिष्ठाना अनाहताज्ञा विशुद्धिचक्रदेशानाम् [१]अन्यतरस्मिन् प्रत्यगात्मनि वा चित्तस्य स्थापनम्। तदेकस्मरणमिति यावत्। ध्यानं नाम "[२]तत्र प्रत्ययैकतानता। लक्षैकगोचरप्रत्ययप्रवाहः" [३]इत्येतत्। प्रत्ययप्रवाहो द्विविधः— विजातीयप्रत्य-यान्तरितस्तदनन्तरितश्चेति। आद्यो ध्यानम् द्वितीयः समाधि। सोऽपि द्विविधः – कर्त्ताद्यनुसन्धानपूर्वकः तद्रहितश्चेति। आद्योऽङ्गसमाधिः [५]द्वितीयोऽङ्गी संप्रज्ञातसमाधिः। सम्प्रज्ञातसमाध्युदये लयविक्षेपकषायरसास्वादाश्चत्वारो विघ्नाः [६]सन्ति। लयो निद्रा। पुनः पुनः विषयानुसंधानं विक्षेपः। चित्तस्य रागादिना स्तब्धीभावः कषायः। समाध्यारम्भसमये सविकल्पानन्दास्वादो रसास्वादः यथाहुः —

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः।
सकषायं विजानीयाद् ब्रह्मप्राप्तं न चालयेत्।।
नास्वदयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्। इति

अस्यार्थः — प्राणयामादिना लयाभिमुखं चित्त [७]मुत्थापयेत्। दोषदर्शन- ब्रह्मानुसन्धानादिना। विक्षिप्तं चित्तं शमयेत्। ब्रह्मप्राप्तं चित्तं न चालयेत्। समाध्यारम्भसमये सविकल्पकानन्दं नास्वादयेत्। किन्तु उदासीनो ब्रह्मप्रज्ञया युक्तो भवेदिति। एवं निर्विघ्नेन सम्प्रज्ञातसमाध्यभ्यासेन [८]अध्यात्मप्रसादमापन्ने मनसि ऋतम्भरा प्रज्ञोदेति। अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयं योगिप्रत्यक्षम् ऋतम्भरा प्रज्ञा। तामपि निरुध्य समाधिमभ्यस्यतः गुणवैतृष्ण्यं परवैराग्यमुदेति। [९]तत्तु निरूपितम्। ततोऽप्यभ्यासः कर्तव्यः। उत्साहप्रयत्नो अभ्यासः। यथाहुः — "तत्र स्थितौ यत्नोऽभ्यासः" इति।

---

१. अन्यतरमन्यस्मिन् – क
२. तत्प्रत्ययकतानता – ख
३. इति यावत् – क
४. तदनन्तरश्चेति – ग
५. द्वितीयोङ्गी सम्प्रज्ञात समाध्युदये – क, ग
६. भवन्ति – क
७. मुल्लापयेत् – ख
८. आत्मप्रसादेन – क
९. नच्च – ख

तस्यापि निरोधे सर्वधीनिरोधो भवति। अयमेवासम्प्रज्ञातसमाधिः। न केवलं परवैराग्यादेव समाधिलाभः किन्तु ईश्वरप्राणिधानादपि। तथा चोक्तम्, "ईश्वरप्राणिधानाद्वा", "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः" "तस्य वाचकः प्रणवः" "तज्जपस्तदर्थभावनम्" इति। [१]एतदुक्तं भवति "ईश्वरप्रणिधानाद्वा समाधिलाभः" क्लेशादिभिरसंबद्धः [२]सर्वज्ञः सर्वशक्तिरीश्वरः। [३]ईश्वरस्य अभिधायकः शब्दः प्रणवः। प्रणवजपो माण्डूक्योपनिषत्पञ्चीकरणतद्वार्त्तिकोक्तप्रकारेण प्रणवार्थानुसन्धानं च ईश्वरप्रणिधानम्। अथवा — "तद्योऽहं सोऽसौ योऽसौ सोऽहम्।" इत्यत्र सशब्देन परमात्मोच्यते। अहंशब्देन प्रत्यगात्मोच्यते। अनयोः शब्दयोः सामानाधिकरण्यात् ब्रह्मात्म्यैक्यमुच्यते। [४]ततश्च सोऽहमित्यस्य परमात्माहमित्यर्थो यथा तथा प्रणवस्यापि। [५]तथा हि — सोऽहमित्यत्र [६]सकारहकारयोर्लोपे कृते परिशिष्टयोः ओ अम् इत्यनयोः सन्धिं कृत्वा उच्चारणे ओमितिशब्दो निष्पन्नः तदुक्तम् –

सकारञ्च हकारञ्च लोपयित्वा प्रयोजयेत्।[७]
सन्धिं च पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत्।। इति

ततश्च ओमित्यस्य शब्दस्य परमात्माहमित्यर्थः। सर्वथा प्रणवजपप्रणवार्थानु- सन्धानरूपेण ईश्वरप्रणिधानेन परमेश्वरानुग्रहात् समाधिलाभो भवत्येव। एवं समाध्यभ्यासेन अन्तःकरणस्य अतिसूक्ष्मतापादनं मनोनाश इत्युच्यते। अनेन सूक्ष्मेण मनसा त्वंपदलक्ष्ये साक्षात्कृतेन महावाक्येन [८]स्वस्य ब्रह्मसाक्षात्कारो भवति। न केवलं समाधिनैव [९]ब्रह्मसाक्षात्कारःकिन्तु विवेकेनापि भवति। अन्तःकरणतद्वृत्तीनामवभासको [१०]यश्चिदात्मा साक्षी तस्मिन् साक्षात्कृते [११]महावाक्यात् ब्रह्मसाक्षात्कारः सम्भवत्येव। तदाहुः —

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानञ्च राघव।
[१२]योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम्।।

---

१. तदुक्तं भवति – क
२. सर्वज्ञः इति पदं 'ग' प्रतौ नास्ति
३. ईश्वरभिधायकः – क, ग
४. ततः – ख
५. तथाहि पदं ख 'प्रतौ' नास्ति
६. सकारे हकारे लोपे कृते – ग; सकार हकार लोपे – क
७. सन्धिं च पूर्वं इत्यनन्तर श्रीमत्स्वयं प्रकाशास्मद्गुरूणा इति पर्यन्तः भागः 'ख' प्रतौ लुप्तः।
८. स्वस्य साक्षात्कारो – ग
९. 'ब्रह्म' इति पदं 'क' प्रतौ नास्ति।
१०. यश्चिदात्म साक्षी – ग
११. वाक्यात् – ग
१२. योगस्तद्वृत्ति रोधो हि – ग

असाध्यः कस्यचिद्योगः कस्यचिद् ज्ञाननिश्चयः।
प्रकारौ द्वौ तदा देवो जगाद परमेश्वरः।। इति

ज्ञानं विवेकः। तृतीयाध्याये "इन्द्रियाणि पराण्याहुः" इत्यारभ्य "कामरूपं दुरासदम्" इत्यन्तेन विवेकं, षष्ठाध्याये योगञ्च "यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते" [१]इत्यादिना वासुदेवः सर्वज्ञः परमेश्वरो भगवान् द्वौ प्रकारो जगादेति श्लोकार्थः तदेवं तत्त्वज्ञानवासनाक्षयमनोनाशाभ्यासाज्[२]जीवन्मुक्तिः सिद्ध्यति इति सिद्धम्। [३]तस्या जीवन्मुक्तेः पञ्च प्रयोजनानि सन्ति। ज्ञानरक्षा तपो विसंवादाभावो दुःखनिवृत्तिः सुखाविर्भावश्चेति। तत्रोत्पन्नब्रह्मसाक्षात्कारस्य [४]पुंसः पुनः [५]संशयविपर्ययानुत्पादो ज्ञानरक्षा। तथा हि — "ज्ञानिनां शुकराघवनिदाघादीनामिव[६] अकृतोपास्तेर्ज्ञानिनोऽस्मदादेः [७]चित्तविश्रान्त्यसंभवात् पुनः [८]कदाचित् संशयविपर्ययौ सम्भवेताम्। अज्ञानवत् तावपि मोक्षप्रतिबन्धकौ। तदाह भगवान् — "अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति" [९]इति। ततश्च जीवन्मुक्त्यभ्यसेन संभवति संशयविपर्ययनिवृत्तिः इति। ज्ञानरक्षा नाम प्रथमं प्रयोजनम्। चित्तैकाग्र्यं तपः—

[१०]मनसश्चेन्द्रियाणाञ्चैकाग्र्यं परमं तपः।
स ज्यायः सर्वधर्मेभ्यः [११]स धर्मः पर उच्यते।।

इति स्मरणात्। ज्ञानिनो जीवन्मुक्तस्य अखिलवृत्तीनाम् [१२]अनुत्पादात् निरङ्कुशं चित्तैकाग्र्यं सम्पद्यते तदेव तपः। तच्च लोकसंग्रहाय भवति। तदुक्तम् — "लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसि" [१३]इति। सङ्ग्राह्यो लोकस्त्रिविधः। शिष्यो भक्तस्तटस्थश्चेति। तत्र सन्मार्गवर्त्ती — शिष्यः। गुरूपदिष्टमार्गेण श्रवणादिना [१४]ब्रह्मसाक्षात्कारं कुर्वन्मुच्यते।

---

१. इति देवः सर्वज्ञः – ग
२. जीवमुक्ति – ग
३. तस्माज्जीवन्मुक्तेः – क
४. पुनः पुनः – ग
५. शंसयविपर्ययादौ – ग
६. निदाघादीनामिव – क
७. चित्तविश्रांन्यभावात् – क
८. कदाचित् इत्यारभ्य अश्रद्दधानश्च इति पर्यन्तो भाग 'क' प्रतौ नास्ति।
९. इति इत्यारभ्य चित्तैकाग्र्यं तपः इत्यन्तो भागः 'ग' प्रतौ लुप्ताः।
१०. मनसश्चेदियाणां ब्रह्मैकाग्र्यं परं तपः क
११. सः धर्मस्य पर उच्यते – क
१२. अनुदयात् – क
१३. 'इति' पदं क प्रतौ नास्ति।
१४. साक्षात्कुर्वन् – क

"आचार्यवान् पुरुषो वेद" "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्ये" इति [१]श्रुतिः। भक्तोऽपि ज्ञानिनः [२]पूजाऽन्नपानादिनाऽभीष्टं [३]प्राप्नोति। तथा च श्रुतिः–

यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं [४]ह्यर्चयेद् भूतिकामः।। इति

स्मृतिरपि

यद्येको [५]ब्रह्मविद् भुङ्क्ते [६]जगत्तर्पयतेऽखिलम्।
तस्माद् ब्रह्मविदे देयं यद्यस्ति वसु किञ्चन।।

इत्यादि। तटस्थोऽपि द्विविधः सन्मार्गवर्त्ती असन्मार्गवर्त्ती चेति। तत्र सन्मार्गवर्त्ती मुक्तस्य सदाचार[७]प्रवृत्तिं दृष्ट्वा [८]स्वयमपि तत्र प्रवर्तते [९]इति। तदाह भगवान् —

यद्यदाचारति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरूते लोकस्तदनु वर्तते।। इति

असन्मार्गवर्त्ती तु "जीवन्मुक्तस्य दृष्टिपातेन सर्वपापै प्रमुच्यते" इति [१०]श्रुतिः। तथा च स्मृतिः –

यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते।
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्विषैः।। इति

द्वेषिणस्तु ज्ञानिनो दुष्कृतं सम्भावितं गृह्णन्ति। तथा च श्रुतिः "तस्य पुत्रा दायमुपयान्ति सुहृदः [११]साधुकृत्यं द्विषन्तः [१२]पापकृत्यम्।" इति। एवं जीवन्मुक्तस्य तपो लोकसङ्ग्रहाय

---

१. श्रुतेः – ग
२. पूजान्यादिनामीष्टं प्राप्नोति – ग
३. प्राप्नोति इत्यनन्तरं 'ग' प्रतौ मनश्चेन्द्रियाणां इत्यारभ्य तथा च श्रुतिः यं यं लोकं इति वाक्यात् पूर्वं कतिचन भागाः पुनरूक्तः। ते च पौनः पुन्यं लिखिता। अतः ते न स्वीकारार्हाः।
४. हयचरेत् – ग
५. ब्रह्मविद् युङ्क्ते – ग
६. जगत्तर्पयतो – ग, खिलम् – ग
७. परिवृत्तिम् – ग
८. स्वमपि –
९. 'इति' इति पदं ग प्रतौ नास्ति
१०. श्रुति इति पदं 'ग' प्रतौ नास्ति।
११. साधुकृत्याम् – ग
१२. पापकृत्याम् – ग

भवतीति। तपो नाम द्वितीयं प्रयोजनम्। जीवन्मुक्तस्य व्युत्थानदशायां [1]कर्मादाय अस्मत्कृतनिन्दादिश्रवणेऽपि पाषण्डकृतनिष्ठुरादिदर्शनादावपि चित्तवृत्त्यनुदयात् विसंवादो न भवति। यथाहुः –

[2]ज्ञात्वा वयं तत्त्वनिष्ठा [3]मनु मोदामहे वयम्।
[4]अनुशोचामहे चान्यान्न भ्रान्तैर्विवदामहे।। इति

विसंवादाभावो नाम तृतीयं प्रयोजनम्। दुःखानि[5]वृत्तिर्द्विविधा, ऐहिक दुःखनिवृत्तिरामुष्मिकदुःखनिवृत्तिश्चेति। तत्र ज्ञानेन भ्रान्तै[6]र्निवृत्ततया योगाभ्यासेन अखिलवृत्तिनिरोधेन चित्तस्यात्मैकाकारतया ऐहिक समस्तदुःखनिवृत्तिः प्रारब्धभोगे सत्यपि। तथा च श्रुतिः – "आत्मानं चेद्विजानीयात्" इत्यादिना ऐहिकदुःखनिवृत्तिं मुक्तस्य दर्शयति। ज्ञानेनाज्ञाननिवृत्त्या सञ्चितागामिकर्मणाम् अश्लेषविनाशाभ्याम् आमुष्मिकदुःखानामपि निवृत्तिः। तथा च श्रुतिः — "एतं ह वाव न तपति किमहं साधुना अकरवं किमहं पापमकरवम्" इत्यादिदुःखनिवृत्तिर्नाम चतुर्थं प्रयोजनम्। मुक्तस्य ज्ञानयोगभ्याम् अज्ञानतत्कृतावरणविक्षेपनिवृत्त्या बाधकाभावात् परिपूर्णब्रह्मानन्दानुभवसुखाविर्भावः। इममेवार्थं श्रुतिः दर्शयति –

समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत्।
न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते।। इति

सुखाविर्भावो नाम पञ्चमं प्रयोजनम्। एवं स्वरूपप्रमाणसाधनफलनिरूपणैः द्विविधा मुक्तिर्निरूपिता। तस्माद्भ्रमविज्जीवन्मुक्तः भोगेन [7]प्रारब्धकर्मणि क्षीणे वर्त्तमानशरीरवाते अखण्डैकरसब्रह्मानन्दात्मना अवतिष्ठते। "न तस्य प्राणा उत्क्रामन्ति अत्रैव समलीयन्ते" "ब्रह्मैव सन् ब्रह्माप्येति", "ब्रह्मविद् ब्रह्मैव भवति" —

विभेदजनकेऽज्ञाने नाश[8]मात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति।।

---

१. कर्मादाय अस्मत्कृत निन्दादि श्रवणोऽपि पाषण्डी क्रूर निष्ठुरादि – ग
२. ज्ञात्वा सदा तत्त्व – ग
३. न तु – ग
४. अनुशोचाम एवान्यान्न – ग
५. द्विधा – क
६. निर्वृत्ततया – क
७. प्रारब्धे कर्मणि – ग
८. मात्यन्तिके गते – क

[1]तद्भावभावमापन्नस्ततोऽसौ [2]परमात्मना।
भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत्।।

इत्यादि श्रुतिस्मृतिशतेभ्यः। भगवान् सूत्रकारोऽप्याह — "अस्मिन्नस्य च तद्योगं शास्ति" इति। तस्मात् "अहं ब्रह्मास्मि" इति तत्त्वमस्यादिवाक्यजन्यज्ञानात् ब्रह्मभावलक्षणो मोक्षो भवतीति सिद्धम्। "[3]न स पुनरावर्तते"

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूत[4]कल्मषाः।।

इत्यादि[5]श्रुतिस्मृतिभ्यः।

श्रीमत्स्वयं [6]प्रकाशास्मद्गुरुणा करुणावशात्।
उपदिष्टपरात्मैक्यं तत्त्वमवेदितं मया।।

ब्रह्मेशविष्णवादिसमस्तदेवाः
स्वस्वाधिकारेषु [7]विभीतचित्ताः।
आज्ञावशाद्यस्य वसन्ति सर्वे
तं कृष्णमाद्यं शरणं प्रपद्यते।।

या भारती शर्वविरिञ्चिविष्णु–
देवादिभिर्नित्यमुपास्यमाना।
[8]वराक्षमालाविलसत्क[9]राग्रां
वाग्वादिनीं तां प्रणमामि देवीम्।।

---

१. सद्भाव – क
२. परमात्मनः – ग
३. न पुनरावर्तते – क
४. किल्बिषा – क
५. इत्यादि श्रुतिस्मृतिभ्यः इति पदं ग प्रतौ नास्ति।
६. प्रकाशाख्य – क
७. विभिन्नचित्ता – ख, ग
८. सदाक्षमाला – क
९. कराब्जाम् – ख

आकाशपुष्पमिव विश्वमहं निरीक्ष्ये
मग्नोऽस्मि नित्यसुखबोधरसामृताब्धौ।
प्रत्यञ्चमद्वयमनन्तसुखैकबोधं
साक्षात्करोमि पदभावनया गुरूणाम्।।

यत्पादयुग्मकमला[१]श्रयणं विनाहं
संसारसिन्धुपतितः सुखदुःखभाक् स्याम्।
यत्पादयुग्मकमलाश्रयणात् सुतीर्णः
तद्देशिकाङ्घ्रिकमलं प्रणतोऽस्मि नित्यम्।।

परमसुखपयोधौ मग्नचित्तो महेशं
हरिविधि[२]सुरमुख्यान्दैशिका[३]न्देशमात्रम्।
जगदपि न विजाने पूर्णसत्यात्मसंवित्
सुखतनुरहमात्मा सर्वसंसारशून्यः।।

यदुकुलवररत्नं कृष्णमन्यांश्च देवान्
मनुजपशुमृगादीन् ब्राह्मणादीन्न जाने।
परमसुखसमुद्रे मज्जनात्तन्मनोऽहं
गलितनिखिलभेदः सत्यबोधैकरूपः।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्य-
भगवन्-महादेवसरस्वतीमुनिविरचितं तत्वानुसन्धानं [४]समाप्तम्।

।।इति चतुर्थः परिच्छेदः।।

---

१. आश्रयणम् इत्यनन्तर विनाहमित्यारभ्य कमलाश्रयणात् इति पर्यन्तो भाग क प्रतौ लुप्तः।
२. सुर मुख्यान् दैशिकं देशमात्रम् – ख
३. देहमात्रम् – ग
४. समाप्तम् इत्यनन्तरं 'ख' प्रतौ ग्रन्थसङ्ख्या ८८४ श्रीरामशिव इति वाक्यं दृश्यते; समाप्तमित्यनन्तरं 'क' प्रतौ पिण्डिना लिपीकृतं शुभम् इति वाक्यमेकं परिदृश्यते।

तत्त्वानुसन्धानम्

अनुबन्धः

उद्धृतानां श्रुतिस्मृतिवाक्यानामकारादिसूची

प्रथमः परिच्छेदः

१. **अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।**
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।।

(भगवद्गीता, ५/१५)

२. **अथात आदेशो नेति नेति नेहि नानास्ति किञ्चन।**

(बृहदारण्यकोपनिषत्, ४/४/१४)

३. **आनन्दो ब्रह्मेति व्यजनात्**

(तैत्तिरीयोपनिषत्, भृगवल्ली, अनुवाक – ६)

४. **तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः**
आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी।

(तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, अनुवाक – १)

५. **तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद**
उत्तरः पक्षः आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा।

(तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, अनुवाक – ५)

६. **यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति।**

(तैत्तिरीयोपनिषत्, भृगुवल्ली, अनुवाक – १)

७. **यथोर्णनाभिः सृजते गृह्णते च**

(मुण्डकोपनिषत्, १/१/७)

८. **यः सर्वज्ञः स विश्वकृत् स हि सर्वस्य कर्ता।**

(बृहदारण्यकोपनिषत्, ४/४/१३)

९. **सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**

(भगवद्गीता, १४/१७)

१०. **साम्नः सायुज्यं सलोकतां जयति।**

(बृहदारण्यकोपनिषत्, ५/१३/३)

११. **विज्ञानं यज्ञं तनुते**

(तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, अनुवाक – ५)

१२. **सत्यं ज्ञानमनन्तं ब्रह्म**

(तैत्तिरीयोपनिषत्, ब्रह्मानन्दवल्ली, अनुवाक – १)

द्वितीयः परिच्छेदः

१. **आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।**

(बृहदारण्यकोपनिषत् ३/४/५)

२. **इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।**
इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मन।

(कठोपनिषत्, तृतीयावल्ली, १०)

३. **उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।**
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।।

(भाट्टदीपिका, अध्यायः - ३)

४. **एकमेवाद्वितीयं ब्रह्म**

(छान्दोग्योपनिषत्, ६/२/१)

५. **ऐतदात्म्यमिदं सर्वम्**

(छान्दोग्योपनिषत्, ६/८/७)

६. **तदैक्षत बहु स्यां प्रजायेय**

(छान्दोग्योपनिषत्, ६/२/३)

७. **न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।**

(महानारायणोपनिषत्)

८. **येनाश्रुतं श्रुतं भवति अमतं मतं भवति अविज्ञातं ज्ञातम्।**

(छान्दोग्योपनिषत्, ६/१/३)

९. **वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्**

(छान्दोग्योपनिषत्, ६/१/४)

१०. **सदेव सौम्य इदमग्र आसीत्**

(छान्दोग्योपनिषत्, ६/२/१)

११. **सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दो ब्रह्मेति व्यजानात्**

(तैत्तरीयोपनिषत्, २/९)

१२. **सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्**

(छान्दोग्योपनिषत्, ६/१/४)

तृतीयः परिच्छेदः

१. **अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।**
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।।

(भगवद्गीता, १३/२५)

२. **एतत्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत।**

(भगवद्गीता, १५/२०)

३. **एवमैवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः।**

(छान्दोग्योपनिषत्, ८/१२/३)

४. **ततः प्रत्यक् चेतनाधिगमोऽप्यन्तरायाभावश्च**

(पातञ्जलयोगसूत्रम्, १/२९)

५. **तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन।**

(बृहदारण्यकोपनिषत्, ४/४/२२)

६. **तरति शोकमात्मवित्।** (छान्दोग्योपनिषत्, ७/१/३

७. **धर्मेण पापमपनुदति** (महानारायणोपनिषत्)

८. **ब्रह्मविद ब्रह्मैव भवति** (मुण्डकोपनिषत्, ३/९)

९. **वेदान्तविज्ञानसुनिश्चिर्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे।।**

(मुण्डकोपनिषत्, ३/२/६)

१०. **स यथा कामो भवति तत् क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते**

(बृहदारण्यकोपनिषत्, ४/४/५)

चतुर्थः परिच्छेदः

१. **अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति।**

(भगवद्गीता, ४/४०)

२. **अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहंकारः समदुःखसुखः क्षमी।।**

(भगवद्गीता, १२/१३)

३. **अभ्यासवैरागाभ्यां तन्निरोधः** (पातञ्जलयोगसूत्रम्, १/१२)

४. **असंशयं महाबाहो मनो दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।**

(भगवद्गीता, ६/३५)

५. **तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।**
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः।।

(भगवद्गीता, ५/१७)

६. **दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।**
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।।

(भगवद्गीता, १६/४)

७. **प्रकाशं च प्रवृत्तिं च** इत्यारभ्य **गुणातीतस्स उच्यते** इति पर्यन्तम्।

(भगवद्गीता, १४/२२ तः २५)

८. **प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।**
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।

(भगवद्गीता, २/५५)

९. **यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

(भगवद्गीता, ३/२१)

१०. **योगश्चित्तवृत्तिनिरोधः।** (पातञ्जलयोगसूत्रम्, १)

११. **लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसि।**

(भगवद्गीता, ३/२०)

१२. **संतुष्टस्सततं योगी यतात्मा दृढनिश्चयः।**
मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः।।

(भगवद्गीता, १२/१४)

१३. **स्थिरसुखमासनम्, प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्, ततो द्वन्द्वानभिघातः** (पातञ्जलयोगसूत्रम्, २/४६, ४७/४८)

० मायाविनिर्मुक्तचैतन्यं तत्पदवाच्यार्थः मायाविनिर्मुक्तचैतन्यं तत्पदलक्ष्यार्थः आपकेचं ०

ॐ स्वस्ति श्रीगणेशाय नमः ॐ ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि १
देहोनाहं श्रोत्रवागादिकानि नाहं बुद्धिर्नाहमध्यासमूलं नाहं सत्यानंदरूपश्चिदात्मा मायासाक्षीकस्सर्वदाहं प्रसिद्ध
२ अथ शास्त्रस्य वाक्यार्थज्ञानाधीनत्वात् तस्य च पदार्थज्ञानाधीनत्वात् तदर्थं तत्पदार्थं निरूपयामः तत्पदार्थस्य
लक्षणं द्विविधं तटस्थलक्षणं स्वरूपलक्षणं चेति सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिविशंतीति श्रुतेः तदुक्तं भगवता सूत्रकारेण जन्माद्यस्य यत इति सत्यज्ञानानंदाः स्वरूपलक्षणं सत्यं ज्ञानमनंतं ब्रह्म यो वेद ब्रह्मैव भवतीति जानीयादिति श्रुतेः उक्तं चानंदादयः प्रधानस्येति स च द्विविधः वाच्यार्थो लक्ष्यार्थश्चेति मायाश्रुण यथा शुक्तिरजतादि कल्पितं तथा चेतनेऽचेतनं कल्पितं इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं पुरुष एवेदं विश्वं सर्वं खल्विदं ब्रह्म वासुदेवः सर्वं नारायणः सर्वमिदं पुराणमित्यादिश्रुतिस्मृतिवाक्यशतैः अचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनात् चेतनाचेतनयोरभेदायोगात् चेतनं नित्यशुद्धबुद्धमुक्तं सत्यं परमानंदाद्वयं ब्रह्म अचेतनमज्ञानादिजडजातं अज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं ज्ञाननिवर्त्यं अहं ब्रह्मेति जानामीत्यनुभवात् देवात्मशक्तिं स्वगुणैर्निगूढां इत्यादिश्रुतेः अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः इति स्मृतेश्च तच्च ज्ञानं द्विविधं मायाविद्याभेदात् शुद्धसत्त्वप्रधानं सत्त्वं मायेत्युच्यते मलिनसत्त्वप्रधानं सत्त्वं अविद्येत्युच्यते जीवेशत्वाभासेन करोति माया चाविद्या च भवतीति श्रुतेः अथवा ज्ञानस्य शक्तिर्द्विविधा ज्ञानशक्तिः क्रियाशक्तिश्चेति रजस्तमोभ्यामनभिभूतसत्त्वं ज्ञानशक्तिः सत्त्वात्संजायते ज्ञानमिति श्रुतेः क्रियाशक्तिर्द्विविधा आवरणशक्तिर्विक्षेपशक्तिश्चेति रजःसत्त्वाभ्यां [illegible] आवरणशक्तिः तदुक्तं कृष्णेन तमः आवरणात्मकत्वात् इति सावनालिनप्रकाशत इति व्यवहारस्तेऽ

अनुबन्धः

भवत्यभेदभेदश्रुतयो [illegible] तत्त्वमसीत्यादिश्रुतिभ्यः [illegible]
[illegible] तयोगंशालोति तस्मादहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यज्ञानाद्ब्रह्मभावलक्षणमो
क्षो भवतीति सिद्धं तत्पुनरावर्तते तद्दुःखं तत्रिशूलतप्तमयाः गच्छन्त्यपुनरावृत्तिं ज्ञानाग्निदग्धकिल्बिषाः
त्यादिश्रुतिभ्यः श्रीमत्स्वयंप्रकाशाख्यगुरुणा कृपावशात् उपदिष्टपरात्मतत्त्वमावेदितं मया ब्रह्मेशविष्णु
दिसमस्तदेवाः स्वस्वाधिकारेषु विभीतचित्ताः शान्तावशान्यमवसंतिसर्वे तत्कृष्णमाद्यं शरणं प्रपद्ये याभारतीशवेदि
रविविष्णुदेवादिभिः नित्यसुखा [illegible]माना तदादिमालाविलसत्कराग्रा वाग्वादिनीतां प्रणमामि देवीं श्राकाशपुष्पमिव
विश्वमदं निरीक्ष्य मग्नास्मि नित्यसुखबोधरसामृताब्धौ प्रत्यक्षमद्वयमनन्तसुखैकबोधं साक्षात्करोमि परमात्मनयाऽरे
णाश्रयाद्युगमकमलाश्रयणं तस्तीर्णमदैशिकाङ्घ्रिकमलं प्रणतोस्मि नित्यं परमसुखपयोधौ मग्नचित्तो मदेशादरि
विधिसुखान्दैशिकान्देशमात्रं जगदपि न दिजानेशं सत्यात्मसंदित्सुखतनुरहमात्मा सर्वसंसारशून्यः यद्भूत
वरत्नैकलमन्यांश्च देवान्मनुजपशुमृगादीन्ब्राह्मणादीन्न जाने परमसुखमपूर्वं मज्जनाज्जन्मयोगं गलितनि
खिलभेदः सत्यबोधैकरूपः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्य
भगवान्मल्लदेवसरस्वतीविरचितं तत्त्वानुसंधानं समाप्तं [illegible] ॥ ॥

[illegible] दुःखभा[illegible]

यद्वा यथाऽकएव स्वटतः क्रियानिमित्तवशेन पाचको वाचक इति व्यपदिश्यते तथाऽकमेव ज्ञानं
विक्षेपावरणशक्तिनिमित्तभेदेन माया विद्येति च व्यपदिश्यते तथा च अविद्याप्रतिबिंबितं चैतन्यं जीवः
अविद्याप्रतिबिंबितं बिंबचैतन्यमीश्वरः आभासएव च अतएव प्रमाणसूत्रकारैरुक्तं यथा ह्ययं ज्योतिरात्मा
विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना भिद्यते भेदरूपादेवः क्षेत्रेष्वेवमजायमानः आत्मा
एकएव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् इत्यादिश्रुतिसूत्रयोः सत्वा
त् अस्मिन् पक्षे जीवस्तु एकएव कल्पितेन अंतःकरणविशेषः प्रमाणाद्यनेकविधः केचित् नानाज्ञानं स्वीकृत्य व
नवद्ज्ञानसमुदायः समष्टिः तदुपहितं चैतन्यमीश्वरः वृक्षवत् एकमज्ञानं व्यष्टिः तदुपहितं चैतन्य
मज्ञानिरेव इति अन्ये तु कारणीभूताज्ञानोपहितं चैतन्यमीश्वरः अंतःकरणोपहितं चैतन्यं जीवः का
र्योपाधिरयं जीवः कारणोपाधिरीश्वरः विवरणादिषु तु सर्वथापि मायोपहितं चैतन्यं ईश्वरः सचज्ञान
मायोपहितं चैतन्यं जीवः विक्षेपादिशक्तिमदज्ञानोपहितत्वरूपेणानादुपाधिर्नानाभि
न्नः यथोक्तं नानाजीवतत्त्वं कर्तृत्वं श्रुतेः यः सर्वज्ञः सर्ववित् सर्वशक्तिः सर्वस्य कर्तेत्यादि

[illegible]

श्रीमत्स्वयंप्रकाशस्य कृष्णकरुणाकटाक्ष उपरि पृष्ठ्यालैक्यतत्त्वावेदितमया ब्रह्मेशाविष्णुआदि
समस्तदेवाः स्वस्वाधिकारेषु विभिन्नचित्ताः आज्ञावशात्यस्य वसंति सर्वे तं कृष्णमाद्यं शरणं प्रप
द्ये यासारतीसर्वविरंचिविष्णुदेवादिभिर्नित्यमुपास्यमाना सदाक्षमालाविलसत्करांभोजाकादि
नीनां प्रणमामि देवीं आकाशपुष्पमिव विश्वमहं निरीक्ष्यमनोस्मि नित्यसुखबोधरसाद्वितीयं प्रत्यंच
मद्वयमनंतसुखैकबोधं साक्षात्करोमि पदभावनया गुरूणां यत्प्रसादयुग्मकमलाश्रयणं विना दुःसंसारसि
धुपतितः सुखदुःखभाक्स्यां यत्प्रसादयुग्मकमलाश्रयणात् सुतीर्णस्तद्देशिकांघ्रिकमलं प्रणतोस्मि
नित्यं परमसुखयबोधौमग्नचित्तौ महेशहरिविधिसुरमुख्यान् देशिकं देशमात्रं जगदपि नविजा
नेपूर्णसत्यात्मसंवित्सुखतनुरहमात्मा सर्वसंसारशून्यः यदुकुलवररत्नं कृष्णमन्यांश्च देवा
न्मनुजपशुमनादीन्ब्राह्मणादीन्न जाने परमसुखसमुद्रमग्नानात्मन्यहं गतनिखिलभद
सत्यबोधैकरूपः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदनाथसरस्वतीपू
ज्यपादशिष्यभगवत्महारेवसरस्वतीविरचितं तत्त्वसंधानं समाप्तं ॥ संख्या ८८४ श्रीरामशि

श्रीगणेशाय नमः। यः परात्सर्वजगत्सृष्ट्वा प्रदिशत्यपुनस्वयं तं कुम्भप्रयागात्मानं वंदे गौर्यामनोहरं १ यस्य प्रसादाद्दृश्यन्ते विश्वरा
सस्तमयि कल्पितं चरं सर्वलोकैकगुरुं महाश्रीस्वयंप्रकाशं गुरुमानतोऽस्मि २ गुरुणां चरणौ भक्त्या प्रणिपत्य निरंतरं। तत्कृपालेश
तो देहं चिंतयेत्कौस्तुभसारभे ३ आरीप्सितस्य ग्रंथस्य निर्विघ्नसमाप्तिकामनया गुरुप्रसादलभ्यतत्त्वानुसंधानलक्षणं मंगल मा
चरन्नयोत्पत्तिप्रयोजनवक्तृनामाभिधेयादिसूचयन् यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन
इत्यादिश्रुत्या गुरुभक्तेस्तत्त्वानुसंधाने प्रत्यंतरंगसाधनत्वात्तमात्स्वयं नमस्करोति ब्रह्मेति यस्य गुरोः प्रसादेन ब्रह्माहं तं गुरुं
प्रणौमीति संबंधः अत्र ब्रह्मशब्देन मायाविनिर्मुक्तसच्चिदानंदचैतन्यमभिधीयते अहंशब्देन स्थूलसूक्ष्मकारणशरीरविनिर्मुक्तं

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितं श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि तं गुरुं १

प्रत्यक्चैतन्यलक्षणया प्रतिपाद्यतद्ब्रह्माहंशब्दयोः सामानाधिकरण्यात्तद्ब्रह्मासि भेदस्त्वमस्यहं ब्रह्मास्मीत्यादिमहावाक्यार्थः
प्रकरणप्रतिपाद्यो विषयः सूचितः तद्ज्ञानाद्ज्ञाननिवृत्तिद्वारानंदावाप्तिः प्रयोजनं तत्त्वासाधिकारी प्रतिपाद्यप्रतिपादकभावः सं
बंधश्चेति ब्रह्माहमिति तत्त्वानुसंधानमेव मंगलं तथा च स्मृतिः स्मृतेः सकलकल्याणभाजनं यत्र जायते पुरुषस्तमजं नित्यं व्रजामि
शरणं हरिं सर्वे वेदाः सर्वक्रिया पुनाति तेषां मंगलं १ येषां हृदिस्थो भगवान्मंगलायतनं हरिः २ अशुभानि निराचष्टे नौति
शुभसंततिं स्मृतिमात्रेण यस्तुं सा ब्रह्मतत्त्वं मंगलं विदुः ३ अहं हरिर्हरति पापानीत्याचार्यदुर्गं ग्रंथारंभे मंगलाचरणमनुपपन्नं प्रमा
णप्रयोजनयोरभावात्तथा हि न तावत्प्रत्यक्षं प्रमाणं मंगलाचरणकर्तव्यतायाः अतीन्द्रियत्वात्

अस्तु तत्त्वमस्यादिवाक्यमखंडार्थबोधकं ततः किं स्यादित्यत आह यावदिति यावद्वस्तुप्रकारेणाहमेव ब्रह्म ब्रह्मैवाहमस्मी
ति महावाक्यजन्यात्खंडापरोक्षवृत्तिरखंडापरोक्षज्ञानं ततो नर्थो नयतिज्ञानेदवाप्तश्च नवर्तीति शेषः तत्राचार्यसंमति
माह तदुक्तमिति आचार्यश्लोकं व्याचष्टे अन्यान्येति अहं ब्रह्मास्मीति ज्ञानं ब्रह्मणः परोक्षत्वानात्मत्वे निवृत्तिः ब्रह्मैवा
हमस्मीति ज्ञानेन जीवस्य पारोक्ष्यत्वाब्रह्मत्वनिवृत्तिः किं बहुना ज्ञानेन नसंयमं सांसारनिवृत्तिः ततश्च प्रत्यगात्मा मुख्यं ते

एवं तत्त्वमस्यादिवाक्यजन्यात्खंडापरोक्षज्ञानान्निवृत्तिर्ज्ञानेदवाप्तश्च तदुक्तं प्रत्यक्बोधोपजनात्सिद्ध्या
नंदलक्षणः अद्वयानंदरूपश्च प्रत्यक्बोधैकलक्षणः इत्यमन्योन्यतादात्म्यपत्तिपत्तिर्यदा भवेत् अब्रह्मत्वं
तदर्थस्य व्यावर्तेत तदा हि तदर्थस्य च परोक्षत्वपर्यवसानं ततः स्वयं पूर्णानंदैकरूपे प्रत्यक्बोधोपपत्ति
रिति अन्योन्यतादात्म्यपत्तिपत्तिः अहं ब्रह्मास्मीति ब्रह्मैवाहमस्मि सर्वजीवाकारवृत्तिः उपाधेः ज्ञाने
निवृत्ते ब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात्स्वात्मानः खंडानंदस्य रूपावस्थानं भवतीति श्लोका
र्थः इति प्रथमपरिच्छेदः समाप्तः ॥

करसब्रह्मानंदात्मनावतिष्ठति ब्रह्मैव सद्ब्रह्मैव भवति क्षेत्रज्ञ एव जयोरसमारं ज्ञानचक्षुषा भवप्रवृत्तिमोक्षं चयं विदुर्यातिते परमियादि
श्रुतिस्मृतिश्रुतिभ्यः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्व
तीमुनिकृतौ चित्तत्वानुसंधानव्याख्यानेद्वैतचिंतामणौ स्तंभे प्रथमः परिच्छेदः समाप्तः ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

श्रीमत्स्वयंप्रकाशास्मद्गुरुणा करुणावशात् उपदिष्टं परात्मैक्यं तत्तमावेदितं मया ब्रह्मेशविष्ण्वादि
सनत्कादेवाः स्वस्वाधिकारेषु विभिन्नचित्ताः आत्मावशात्यत्र वसंति सर्वे तत्कल्पमाद्यंतरणं प्रपद्ये
या भारती सर्वविरंचिविष्णुदेवादिभिर्नित्यमुपास्यमाना सदाक्षमालाविलसत्करा जीवात्मादि
नीतां प्रणमामि देवीं आकाशपुष्पमिव विश्वमहं निरीक्ष्य मग्नोस्मि नित्यसुखबोधरसाप्तितोऽयं जयं च
मद्वयमनंतसुखैकबोधं साक्षात्करोमि परभावनया गुरूणां यस्याद्युगमकमलाश्रयणात् विनाद्संसारसि
धुपतितः सुखदुःखभाक् स्यां यस्याद्युगमकमलाश्रयणात् सुतीर्णस्तद्दिशिकाधिकमलं प्रणतोस्मि
नित्यं परमसुखपयोधौ मग्नविनोमहेशहरिविधिसुरमुख्यान् दिशिकदेशमात्रं जगदपि न विजा
नेपूर्णसत्यात्मसंवित्सुखतनुरहमात्मा सर्वसंसारशून्यः यदुकुलवररत्नं नप्रमन्यान्यदेवा
न्नमनुजपशुमृगादीन्ब्राह्मणादीन्न जाने परमसुखसमुद्रमज्जानतन्मयोहं गतनिखिलभेद
संसबोधैकरूपः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदनाथसरस्वतीपू
ज्यपादशिष्यभगवत्महादेवसरस्वतीविरचितं तत्त्वानुसंधानं समाप्तं ग्रंथसंख्या १८४ श्रीरामशिव

National Mission for Manuscripts
New Delhi